
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

श्रीगणेशाय नमः ॥ अथ भैम्याः पुरः तान्नलस्य गुणान्हंसमुखेन व
र्णयितुं तृतीयसर्गमारभ्यते ॥ आकुंचिताभ्यामिति ॥ अथो पवनप्राप्त्य
नंतरं मंडलकरणानंतरं वा हंसः आकुंचिताभ्यां पक्षतिभ्यां पक्षमूलाभ्यां
नभोविभागात् आकाशदेशात् तरसा वेगेन अवतीर्य उत्तीर्य उपभैमी भै
मीसमीपे भुमौ पपात ॥ उपनिशातिस्म ॥ किंभूतः निवेशदेशोउपवेशस्था
ने आततौ विस्तारितौ धूतौ कंपितौ च पक्षौ येन सः पक्षी जाति ॥ १ ॥ आ
कस्मिक इति ॥ पक्षपुटेन पक्षद्वयेन आहतायाः क्षितेः सकाशात् आ
कस्मिकः अचिंतितो पतनतः आ[illegible]त्थानहेतुकः यः स्वनः शब्दः तदाप
तनसमये उच्चचार उदभूत् ॥ अकर्णलाततुं ॥ स शब्दः तस्याः भैम्याः अं
तःकरणं प्राक् झटिति संभ्रांतं ससंभ्रमं चकार ॥ आकस्मिकशब्दश्रव
णात् ससंभ्रमा जातेति भावः ॥ किंभूतायाः तस्याः अन्यविन्यस्तदृशः

५२ ॥ अन्यत्र हंसनदेशात्प्रदेशांतरेषु विन्यस्ते चालिते दृशौ यस्याः सा कुतो ॥ १ ॥

यं शब्द उत्पन्न इति इतस्ततः विलोकयंतीति भावः ॥ २ ॥ नेत्राणीति ॥
वैदर्भसुतासखीनां भैमीसखीनां नेत्राणि निरूपाख्यं स्तोतुमशक्य
रूपं सौंदर्यं यस्य तं एकं केवलं हंसं प्रापुः सादरं यपुरिस्पर्धः ॥ किंभूता
नि विमुक्तः सक्तः तेषां तेषां विषयाणां स्रक्चंदनवसगीतादीनां ग्र
हो ग्रहणं यैस्तानि कर्षा[illegible]कानि किमिव ॥ यतव्रतानां योगिनां चेतांसि
ब्रह्मेव परमात्मस्वरूपमिव तान्यपि विमुक्ताः [illegible]विषयाः स्रक्चंदन
वनितादयस्तेषु ग्रहः अंगीकारो यैस्तानि ॥ निरूपाख्यरूपं इत्यतया

गात पारयितु अत्यल्परूपयागमनोविषयत्वात् ब्रह्मणः एकं अद्वितीयं
च॥ वैदर्भीः विदर्भाणां राजेति पूर्ववत्॥ तत्तदिति विप्सायां द्विर्वचनादे
कत्रोषाभावः॥ ३॥ हंसमिति॥ असौ भैमी दरीणा सत्त्वयेन अदरिणा
निर्भयेण वा त्रायेन पाणिना हंसं ग्रहीतुकामा धर्तुकामा सती स्विका
यां स्वियायां तनो शरीरे निश्चलतां जगाद प्राप॥ चित्तेतु चंचला अस्तव
त्॥ किंभूतं हंसं॥ संनिहितं निकटं॥ स तान नलेन निहितं प्रेषितं वास्त्र
रं तं गच्छंतं प्रयत्नपूर्वकं निश्चलत्वं वा लक्षाद्भुयं धारणाक्षितिनिवेशात्
स्त्यात्त्वात्॥ कस्य केव॥ मुनेः मनोवृत्तिरिव॥ यथा मुनेर्योगिनः
मनसो व्यापारः स्विकायां तनौ चरंतं सद्विमन्यादिषु निंतिरां निहीतं ध्या
तं सम्यग्वा तेस्य प्रवनितरां हितं दृष्टं॥ हंसं परमात्मानं आस्त्रयुक्तेन
आत्रायेनास्ति प्रायेण ग्रहीतुकामा ज्ञातुकामा सती निश्चलतां प्रापे
ति॥ पक्षीधारण जातिः हंसः पक्षीणि विशुद्धो च॥ स्विकेति नस्त्रेषेति
वत्वं॥ ग्रहीतुकामा ग्रहोलिटि द्वितो दीर्घः॥ तुकामेति सलोपः॥ आदरि
णेति अतद्वनंतस्य नञ्समासः॥ ४॥ नामिति॥ अयं हंसः तां कु॰गम भुजं
नादिरूपां स्तैम्याः माया स्वधारण कपट वर्त्तिं इंगितैः चेष्टाभिः अनुमाय
ज्ञात्वापि वियदाकाशं नोत्पपात॥ उड्डनयविषयं न चकार॥ किंतु अ
लोपरि पालुकं स्वोपरि पतनशीलं तत्प्राणिं भैमीहस्तं अदूरं प्लुतिलाघ प्लु
वेन उत्प्लवनलघुतया मोघं निष्फलं विते ने सतत जान्॥ प्रतार्य द्रूयं वि

४

जन प्रदेशोनेति तत्र्येदि कुध्यानोस पात ॥ वियदुत्तत्तनेधारणार्थंप्रयत्नं
अस्त्वेव गर्यं गमीष्यतीति दोसासिद्धि स्यादिति भाव: ॥ अनुमोबनत्याम
पीति निषेध्यान्नत्वं ॥ पातुकमिति लषपतेति शील्लेउकञ् ॥ उपरीपा
तुकं सहसुपेति समासं कृत्वा पश्चात्सूत्रेण षष्ठीसमास: ॥ अन्यथा पुर
ग्रा पुत्तोति षष्ठीसमासनिषेध्यप्रसंगात् पातुकशब्दस्य उकप्रत्ययां
तत्वेपि उपरिपातुकशब्दस्य तदंतत्वाभावान्न लोकेति षष्ठीनिषेधात्ता
व: ॥ ५ ॥ व्यपरिति ॥ आलिभि: सखिभि: तत्कालं तस्मिन्काले परस्परं अन्योन्यं
अर्पितोदत्त: हस्तेषु ताल: तालिकाय स्यां क्रियायां यथा भवति तथा अलं अत्य
र्थं अहहस्यत हसितं ॥ किं कृत्वा अस्या: भैम्या: व्यवसायं पक्षिधारणोद्यमं
तत्पुतिलाघव प्रकारेण तेन पतत्रयेन पक्षिणा हंसेन व्यर्थीकृतं अव
साय ज्ञात्वा परस्परां परश्च परश्च परस्परां ॥ कर्मव्यतिहारोसर्वनाम्नो द्वेस
वतइति द्वित्वं ॥ बहुलवचनात्समासमाव ज्ञानोवा चेव पूर्वपदस्य प्रथ
मैकवचनोत्वं ॥ कस्कादित्वात्स: स्त्रीनपुंसकयोरुत्तरपदस्य वाम्भा
वो वक्तव्य इति उत्तरपदस्याम्भाव: ॥ तत्कालं कालाध्वनोरिति द्वितीया
॥ ६ ॥ उच्चैति ॥ तया भैम्या आलिवर्ग: सखिजन: इति अनेन प्रकारेण
उपालंभि उपालब्ध्य: ॥ इतीति किं ॥ इदानीमपि एतं यास्य यंसांसस्तंभ
यतीभि: एष: हंस: करतालिकानां हस्ततालानां रवाहादनात् उच्चाट
नीय: उड्डनीय: अञ्ज कांकु: एतस्य ग्रहणोमयायत्न: ...भवतीभि:
...स्त्रीयते एतन्न युक्तमिस्वर्थ: ॥ अत्र आस्तृ...यतीषु मध्येयामा

::२::

::२::

मन्वेति अवगमिष्यतीत्यामध्यमेव हृदयसंवरण शब्दस्य आवृत्तिः ॥
ममद्रोह मेवं करिष्यतीति अन्वेति इत्येति वर्तमान सामीप्ये इति भवि
ष्यति लट् ॥ अन्यादेशोपि न च वाले तिरेव शब्देन साक्षाद्योगे निषेधा
न्मध्यमिस्तत्र न मर्यादेशः ॥ मध्य कुध्य ध्रु हेति चतुर्थी ॥ ७ ॥ ध्वनेति ॥
श्यामा यौवनस्था हंसस्य पश्चाल्लगति स्म च चाल ॥ किं कृता ॥ सविनां
हसिते उहास्य विषये वक्र परा ध्या भावात् ध्वतः स्तः अल्पः कोपो यया
॥ तथा हंसस्य करे ग्राहे रक्तेनानवाप्ते रवाप्तैर्हेतोः मंदाक्षेण लज्जयाद
श्यासल ज्ञेसर्पं ॥ कस्य केन ॥ भास्वंतं सूर्यं अस्ति प्रयातुः सूर्यसन्मु
खं गच्छतः पुरुषस्य छायायथा तथैव पश्चाल्लगति छायापि हंसस्य सू
र्यस्येव कीपणाप्तेः श्यामा भवति ॥ हंसस्य पश्चात् इत्युनयोगे षष्ठी ॥
तसमर्थे प्रत्यये नैति षष्ठी पश्चादिति निपातः ॥ मंदाक्षं ह्रीस्त्रपेस्य
मरः ॥ ८ ॥ शास्तेति ॥ तास्तिः सखीभिः इति पूर्वोक्त प्रकारेण छलेन
छल शब्देन हास्यमानासोपहासं मुच्यमानासा नैमी ॥ इति लक्ष्मा
णं सखीः प्रति हास्यवदति स्म इति किं ॥ हे भैमी हंसासि मुखी रा
ज हंसासि मुखी अभ्यस्य सूर्यसन्मुखीयात्राति पुनः राजपुत्र्याः न
त्रास्ता अत्राकुलाच्छास्त्रनिषिद्धत्वादिति सखी वचनं इति किं ॥ हे स
रव्यः एषः हंसो मे मम नैवात्राकुनी भवेत् अपशाकुनरूपो नैव
भवेदिति प्रार्थनायां लिङ् ॥ यतोयं भावि भविष्यत्प्रियतस्यावे
दकः सूचकः राजहंसासि मुखीयात्राशाकुनरूपेव हंसदर्शनस्य

श्रवणस्य च यत्संतराजेन सर्वसिद्धिकरत्वेनोक्तमिति भावः ॥ अतएव
वत्तावीलोकोत्तरस्तुत्यदर्शनालोकोत्तरे श्रुत नलस्रासिरनुमीयते ॥
यः श्रियो नलस्तस्यावेदक इति च ॥ जविषयं नु रागवान्खा ॥ नैवा
शकुनिः पक्षीवेतिवा ॥ असाविस्संप्रति बुधमितिया शनिषेधात् ॥
न चायं सूर्यः किंतु पक्ष्येव ॥ अशकुनशब्दादशुभसूचकायक्षिप्रति
षेधकाच्छ्रवत्रयाणीतिकारः ॥ पक्षीनिषेधकादशकुनीशब्दान्नेति
दीर्घीभावागम्यादिः ॥ ॥ ७ ॥ ॥ हंस इति ॥ न केवलं ताभिरेव हसिता
किंतु असौ हंसोपि वैलक्ष्यहेतोस्तैमील ज्योत्पादनमेव हेतुः तस्याः
एव तद्दिया भैमीसंबंधिनी गतिः अस्याः एव अग्रे अनुकृत्य अनुकृ
त्य इत्यत्रेति येन उपहसन्निव उपहासं कुर्वन्निवाव त्रासे श्रुते ॥
किंकुर्वन् हंस स्व कृति गमनं यस्यास्ताः सुदत्याः भैम्याः पुरः पुरः
अग्रे अग्रे चारु रमणीयं चलन् ॥ परिहासकोपि वेशाघनुकार
णेनान्यान्सहेपयति ॥ सुदत्यावैलक्ष्यहेतोः इति च षष्ठ्यतसम
र्थे षष्ठी हेतुप्रयोग इति षष्ठी ॥ १० ॥ पद इति ॥ भो हंस ग्रहणानुसं
धानं तद्यतीसा भैमी भाविनी भविष्यति पदे पदे चरणविन्यासे एनं हंसं कर
प्राप्यं हस्तप्राप्यं नूनं निश्चयेन यथा अवैति जानाति उत्तरपदे एनं अवश्यं
धारयिष्यामीति जानाति ॥ यथा स खेलं सक्रीडं चलता गच्छता तेन हंसेन
प्रतार्य वंचयित्वा सा स्तनांगीलतासु वल्लीषु समीपे आचस्पर्श आस्पृष्टा ॥
भाविनीयमिति पाठे भाविनी पदविशेषणं भाविनीति पाठे हंसप्रासेः को

॥ ३ ॥ ॥ ३ ॥

प्रि

पन्नेसर्पः॥सर्वांगीतिविरहपीडासूच्यते॥ग्राप्यं इस्या ध्वेसावस्यपके पद
सः॥११॥हंसेति॥किरवत्स्तुकवत्मानुषीवाक् यस्य पथाश्रुकोमनुष्य
वाचावदतितथाहंसोएतांरुषाक्रोधेननिषिद्धः आलिजनःसखीसमूहो
ययाअतएवछायेवाद्वितीयासहचरीयस्यास्तामिकाकिनीतथाश्रमा
र्त्तः कलोः श्रमजनितघर्मोदकबिंदुभिः भूषितमंगंयस्यास्तांयदाकलयांचका
र॥ज्ञातवान्तदातांप्रतिअवादीत्उवाच॥छायाद्वितीयामित्यनेनदत्सादरःसू
चितः॥श्रमार्त्तइत्यनेनश्रांतेयमतःपरंनागमिष्यतीतिदूरसंकर्तुं अत्राक्यंतस्मा
दत्रैस्थातव्यंमयाइतिसूचितं॥भूषितपदेनश्रमबिंदुनांमुक्तासाम्यंसूचितं
॥छायया कांत्या अद्वितीयां अविद्यमानप्रतिमतां रुषानिषिद्धालिजनांश्र
मार्त्तः कदाकभूषितांगीं च यदा ज्ञातवानितिवा॥मानुष्यस्यवागिववागस्ये
तिवा॥१२॥ ॥अयेति॥अयेभैमीकियत्दूरंयावत्उपैषीआगमिष्यसि
वासमुच्चये॥तमिहश्रमनेनसकारेणशीघ्रगमनादिनाव्यर्थंनिःफलंकिं
वाथपरिश्राम्यसि॥कथय॥किं आक्षेपे॥वयेइतिव्यर्थंपक्ष्यर्थेवाश्रमेण
कार्यइत्यर्थः॥किमर्थमितिपाठेअर्थशब्दःप्रयोजनवाची॥ततश्चकिं
प्रयोजनमित्यर्थः॥यातीतियाःतद्वत्याइवइतियावत्सोमपाशब्दवत्प्र
क्रीया॥शीघ्रगामीपुरुषवत्कियत्दूरंउपैष्यसिव्यर्थमेवपक्ष्यर्थेइहं
किंपरिश्राम्यसि॥काकाप्रश्नोत्तरव्यर्थंकियत्दूरंउपैषीतीवा॥बालेभैमी
परिश्रमंतद्वैव्यर्थं चेन्नगच्छसितर्हिघनाःनिर्विडावना॥लीःवनपांक्तीः
विलोकयंसाःपत्रंपंसास्ते तवनीरपिश्रयमपिकिंनोदेतिनुनोसघतेकिंबा

लायाक्षिप नवन पंक्तिदर्शनेन नक्षयेन उदितव्यं ।। तदपितवनोदे तिइति
आश्चर्यं ।। नवालेति पाठे बवयोरक्ते शतनवाः नूतनाः आलयोस्सख्यो ।
यस्यास्तं सं बुद्धिः नुतनवाना नाम्नौंबालीवनसमीपे परिस्थस्यगतास्तथा
परियातानेतिभावः ।। यावदुपेषीति यावत्पुरेति भविष्यतिलट् ।। क्षिती
यपक्षे याइति क्विबिति क्विप ।। तदंतावृत्तिः उपेषीति वर्त्तमानसामीप्ये भ
विष्यतिलट् ।। एतेराज्यादिद्वासूर्वेण सहएसे धतीतिवद्धिः ।। ।।१३।। ।।
वधेति ।। इयंवनालीवनपंक्तिः आलीवसखीव मरुतावायुनाललंतो
विलसंतः पल्लवा तल्लक्षणापाशायः तेषां कंपनैः सत्वात्तथा कपोतानां
पारावतानां हुंकारगीः हुंकारइतिशब्दः तया च अपथे मद्धारणरूपे
अस्थाने अमार्गे चिव धानिः फफलं पदं व्यवसायं चरणन्यासं च अ
र्पयंतीं कुर्वतीं तां प्रतिषेधयती पत्रपयावाक्यार्थः ।। कर्मसखापिकरे
कंपनैः हुंकारेण च सर्वीनिषेधत ।। पदंव्यवसितत्राणस्थानलक्ष्मं
ष्क्रिवस्त्क्षिसमरः ।। अपथेपथोविनाबेति अप्रत्यये ।। अपथंनपुंस
कमितिसाधुः ।। अपथंनपुंसकमिति साधुः ।। हुंकारकीरेति पाठे कि
रतीतिकिरः इगुपधाज्ञाप्रीकिरः इत्सनेन कोकांतेन पूर्वस्यकर्मष
ष्ठीतिसमासइतिसिद्धांतः ।।१४।। ।। अस्थानगमेवाह ।। धार्यइति ।
हे भैमीव सुधायामेव एका असाधारणा गतिः यस्याः वसुधैव एका
गतिः यस्याइतिवावस्थासाविपत्ति अंतरिक्षे विहारे [illegible] नलंयस्येवं भू
तोहं कथं कारं कथं अभिधार्यः धर्तुं शक्यः अपितु न कथंचित् ।।

।।४।।

व्यवसायः

।।४।।

अहो आश्चर्ये संबोधने वा ॥ स्मरस्य सखा कामस्य मित्रेण अनेन प्रत्यक्ष
दृश्येन वयसा पितारुण्येन तव शिशुत्वं बालत्वं अद्यापि न खंडितं न
नाशितं मम गमनगामित्वं खस्य च केवलमूर्ध्वगामित्वं अविचार्यैव
मम ग्रहणं करोषीति भावः ॥ प्रश्नकाकुर्वा ॥ वयःसंधिरुक्तः ॥ अथ च
स्मरस्य स्मरतुल्यस्य नलस्य मित्रेण अनेन मत्क्षणेन वयसा पक्षिणा ॥
तव इदं शिशुत्वं बालत्वं न खंडितं अपि तु खंडितप्रायमेव मया त्वं ग्रामे
वं नलप्राप्तेः करिष्यमाणत्वाद्बालत्वं दूरं इति गमीष्यतीति भविष्यत्यपि भू
तवदुपचारः ॥ धार्ष्ट्यं त्वा कीलितुं इति रहस्यः ॥ कथंकारमन्यथैव कथमि
ति णमुल् ॥ अवसाहस कर्तृत्वात्तृतीया ॥ सख्या भावित पुंस्कत्वात्साधुः
॥१५॥ मयि च्छते पित्तव न किंचित्फलमित्याह ॥ सहस्रेति ॥ हे भैमी वयं
सहस्रपत्रं कमलं आसनं यस्य ब्रह्मणः तस्य पत्राणि वाहनानि हंसा
स्तेषां वंशस्य कुलस्य पात्राणि पक्षभूताः सहायभूताः पतत्रिणः स्मः भ
वामः ततः किमत आह ॥ अस्मेति ॥ अस्माद्दृशां मादृशां चाटुनि प्रियव
चनानि तेषु योरसः शृंगारादिः तल्लक्षणानि अमृतानि स्वर्लोके ये लो
का जनास्तेऽभ्य इतरे च पृथ्वी पाताललोकवासिनस्तैर्दुर्लभानि दुः
प्रापानि अमृतानि भुविजनानां दुःप्रापाणि णिमानुषीत्वं मदर्थं कि
मर्थं क्लिश्यसीति भावः ॥ पत्रं स्याद्वाहने पर्णे पक्षे च शरपक्षिणामि
ति विश्वः ॥ अस्मदो द्वयोश्चेति स्वास्ति प्रायं च इति बहुवचनं ॥ श्वेति स्वा

भिप्रायं च इति बहुवचनं ॥ नलतडागस्थहंसाभिप्रायं वा ॥ अस्माद्दृशां
आ सर्वनाम्न इत्यात्वं ॥ दुर्लभानि नस्यु दुर्लभ्यामिति नुम भावः ॥१६॥
ननु भवतां हंसानां सुवर्णशरीरत्वं कथमित्यत आह ॥ स्वर्गेति ॥ हे भैमी
वयं अन्नानुरूपाभक्षणीययोग्यां तनुरूपसमृद्धिं कायकांतिसमृद्धिं भजामः ॥
प्राप्नुमः ॥ किंभूता स्वर्गापगा स्वर्गनदी तस्याः हेमम्रणालिनीनां सुवर्णक
मलिनीनां याः नालाः मृणालानि च तेषां अग्राणि क्रमेण कमलानि कोम
लानि बिसावयवाश्च नालासंबंधिनी मृणालानि वा भुंजते इति भुजाः ॥ कि
प् ॥ इति प्रसिद्धं ॥ कार्यं च यदिनीशनात् आदिकारणात् मृत्पिंडादेः समवायि
कारणात् ॥ गुणान् कार्यादीन् अधीनं लभते ॥ कारणगुणाः कार्यगुणा
रंभंते इति नैय्यायिकाः ॥ प्रस्तुते: सुवर्णमृणालभक्षणात् सुवर्णमयत्वम

स्माकमिति भावः ॥ नालशब्दस्त्रिलिंगा ॥ नलस्येमे नाला इति वाक्षिप्त्वं प
दं ॥ स्वरूपसमृद्धिं अस्य इति प्रकृति भावः ॥ निदानात् ॥ आख्यातोपयोगे इति
आपादानत्वं ॥१७॥ ननु यदि भवान् ब्रह्मणो वाहनं तर्हि भुवं प्रत्यागमने
अत्रागमने च को हेतुरत्र आह ॥ धातुरिति ॥ हे भैमी क्रीडारसलंपटस्य प्रा ष्ठ
मस्य धातुः ब्रह्मणो नियोगात् आज्ञया इह भूलोके नैषधीयं नलसंबं
धिलीलासरः क्रीडासरः सेवितुमालोडयितुमागतेषु प्राप्तेषु हेमेषु सु
वर्णमयेषु हंसेषु मध्ये एकोहमेव भूलोकविलोकने उत्कः उत्कंठितः स
न् भ्रमामि विचरामि ॥ भूलोकपर्यटनप्रसंगादत्रागत[illegible]हमित्यर्थः ॥ मत्स
दृशा हंसा बहवो नलसरसी क्रीडंत इत्यर्थः ॥ हेमेषु विकारे अनुशत्तो

॥५॥

दिव्यादन्यं तद्भान्नजस्स्रतिभावः ॥ हंसेषु निर्धारणे सप्तमी उत्कं उन्मनाइ
ति निपातात्साधुः ॥१८॥ सार्थः कथंकारमितिति यदुक्तं तत्र स्वरूपं दर्शयन्नेन श्रां
तस्य तद्व्यवहारश्लोकः प्रयासद्दुःसाध्यां कायामाह ॥ विधेरिति ॥ हे भैमी अहं
विधेः अलक्षणः कदाचित्कस्मिंश्चित्समये अमराणां विलासे बाह्यलीलायां भ्र
मात् तरेभ्यः परिश्रांतेभ्यः स्वमहत्तरेभ्यः निजपूर्वजेभ्यः हंसेभ्यः स्कंधस्य
विश्रांतिं अदां ॥ तेषु श्रांतेषु तद्धारमहमग्रहिषं ॥ किंभूतो हं ॥ अविश्रमं क्व
चित् विश्रांतिमलभैव निश्वगोपि सर्वलोकगाम्यपि पितरादित प्रवृत्तिं न
श्राम्यामि न श्रांतो न भवामि निजपूर्वजप्रसादात् श्रमरहितो विश्वं भ्रमा
मीति भावः ॥ भ्रमणांस्स्यतल्पुट् ॥ श्राम्यामि भ्रमामश्चामिदीर्घः ॥ उप्रकर
णेन्यत्रापि गमेर्डो द्रष्टव्यत इति विश्वगड्डस्प्रडः ॥१९॥ ननु पक्षीणः सर्वत्र
बंधन संभवात् त्वं कथं न बद्ध इत्याशंक्य नलप्रसंगेन उत्तरं मयप्रकृति ॥
बंध्यापेति ॥ कश्चित्सात्वादिः धाभुरादिः दिव्यादिदिवित्तवे माद्दशी मत्सदृशोति
रश्चि पक्षिणी विषये बंध्याय बंधनाय माद्दशं बद्धं आसादित पौरुषः प्राप्तसा
मर्थ्यो निस्यात् न भवेत् ॥ दिव्यत्वादेवाहं केनचिद्बद्धुं न शक्य इत्यर्थः ॥ पर
मपंविशेषः ॥ विरलोदयस्य विरलजन्मनः क्वचित्कस्यचिन्नरस्य पुरु
षस्य तत्प्रसिद्धं एकमसाधारणं स्वर्गभाग्यं स्वर्लोके स्वकुचंदनादि
भोगयोग्यं भाग्यं भुक्तं कर्म विनाय योभूमिदः स्वोपि स्वर्गं भुंक्ते तस्यैव मा
द्दशा भवेयादिति भावः ॥ एवंविधः कश्चन न सर्वइत्यर्थः ॥ अथ चविगतो
रेफो विरः तस्य रस्य स्थाने लस्य उदयो यस्मिन् तस्य नलस्य यद्वा ॥ नरश्रा

वृक्षविशेषेण रक्षणेनेलोदयो यस्य उत्तयथापि नलस्येस र्थः॥ ततश्च नल
स्य तदेकं स्वर्गे गमनागमं भाग्यं विनामाहत्म्यं धर्तुं कोपि न शक्नोतीति नलस्य
स्वर्गे गमनागमं ध्येयस्यैव माहात्म्यावत्त्रयात् इति भावः॥ स चासौ नरश्चेति तन्न
र इति वा बंधायत्नमर्थादिति चतुर्थी॥ दिव्ये दिगादित्वाद्यत्॥ एवं प्रभ
विमति द्वितीया॥ विरलैरिति प्रादिभ्यो धातुजस्येति॥२०॥ नरस्य स्व
र्गे गमनागमनेयकुत इत्यत आह॥ इष्टेनेति॥ इष्टेन यागादीना पूर्तेन प्रपादी
ना अपेक्षिताभिः फ दक्षिणादीना इष्टेन वा वत्त्रया अमर्त्याः देवा अत्रापि भू
लोकेपि मनुष्यजन्मन्यपि नलस्य स्वर्गं गं सृजंती॥ यागबाहुल्यं तडाग
बाहुल्यं च नलं विनाकेनापि न कृतमिति तस्यैव वत्त्रयात् [illegible] स्वर्गं
सृजंति॥ देहांतरदेशांतरत्वाविस्वर्गफलं कपम अत्रैवेत्यात्रां क्याह॥ अ

॥६॥ चेतना अपि महीरुहाः वृक्षाः दोहदशीकरात्के: धूपादि दोहदसाम ॥६॥
र्थ्यात् गर्भाधानौषधिनिक्षेपसामर्थ्यात्॥ वाउदकसेकसामर्थ्यात्
च आकालिकं अन्यकालेत्तवनयोग्यं कोरकं कलिकामुद्गिरंती॥ का
लांतरेपि प्रकटयंती॥ तथा वृक्षा अपि इष्टेन दोहदेन पूर्तेन खातेन
आलवालेन नलाधीनाः संतो दोहदसेकसामर्थ्यात् आकालिकं कोरकं
उद्गिरंति इत्यपि ज्ञेयं॥ इ अन्योपि दृष्टः वृक्षः स नरस्वर्गफलतुल्यं वस्तु ददा
ति॥ त्रिषु पक्रतुकर्मेष्टं पूर्तं खातादिकर्मणि इत्यमरः॥ वत्त्रयाः क्रांगत्वादिति
यव महीरुहा इत्युपधात्कः॥ अकाले भव अध्यात्म इत्यादि ठञ्॥ पूर्तेनन
ध्यास्त्वेति गणनिषेधः॥२१॥ स्वर्गं गमेव नक्ति॥ सुवर्णेति॥ वयं स्मरके

कू

लिकाले सुरतक्रीडासमये पक्षैः तं रूपं नलं विजयाम ॥ तस्य स्तुतैरेवे
दापनयनं कुर्मः ॥ किं सद्यः सुवर्णशैलात् मेरोः तूर्णं झटिती अवतीर्या
गस्य ॥ किं रूतैः पक्षैः ॥ स्वर्वाहिनी मंदाकिनी तस्याः वारीकणाः जल
कणाः तैः आकीर्णैः व्याप्तैः तथा गौरत्वात् चामरैः बद्धं स्तंसत्वं साद्द
श्यं यैः चामरतुल्यैरित्यर्थः ॥ अथ च अमरैः देवैः सह बद्धं सख्यं यैः
देवैरपि नलस्य सख्यत्वेन गीः स्तूयते ॥ अस्मत् पक्षैरपीति तैः सह सख्यं ॥
अस्मिन् पक्षे देवाः वयं च विजयमानः तूर्णमिति अनेन सेवाधर्मः सू
चितः ॥ ७ ॥ वरस्य स्पृष्टः ॥ २२ ॥ तस्याः नले अनुरागं दृष्ट्वा तद्वर्णनं प्रक्रम
ते ॥ क्रियतेति ॥ केके साधु वदति साधुनां विश्ववसाविरागेन चिंता
विचारणा च यदि क्रियते तदा तर्हि सा नललक्षणा व्यक्तिः प्रथमा आ
द्या अभिधेया ॥ वक्तव्या ॥ साधूनां मध्ये नल एव प्रथमो गण्यत इति
भावः ॥ सा काया स्वौजसां स्वकीयतेजसां विलासैर्विस्तरैः बहु असं
ख्यातं अनामपदं नमनं नामः स न विद्यते येषां ते अनामाः शत्रवस्ते
षां राज्ञां कार्यं घटादीनी दानात् आदिकारणात् मत्पिंडादेः समवायि
कारणात् गुणान् कार्यादीन् अधीतेलक्षते ॥ कारणगुणाः कार्य
गुणानारंभंते इति नैय्यायिकाः ॥ प्रसृतैः सुवर्णमणालक्षणात् सु
वर्णमयं यदि रत्नानां खानं तावत् साकल्येन साध्यति तुं स्वाधीनं क
र्तुं क्षमा समर्था भवेत् ॥ तावत् अतीमनतः क्षमानामपदं पृथ्वी संज्ञकं

पदं साधयितुं एकैव बहुः अनेकः स्यात्स्यादिति सविसर्गपाठः ॥ इति वा ॥ एतेन
पृथ्वीमंडले स एव राजा नान्य इति सूचितं ॥ इति व्याख्यानं ॥ अथ च चेत् य
दि साधुसम्यक् विभक्तीनां सुपां तिङादीनां विभक्तीनां चिंताविचारणा क्रि
यते तदा साव्यक्तिः विभक्तिः प्रथमाभिधेया ॥ प्रथमेति अभिधेयं संज्ञाप
स्यास्य ॥ स्वाकायास्वौजसां एकवचनद्विवचनबहुवचनसंज्ञकानां प्रत्य
यानां विलासैः यथायथासंभवं विसर्जनीयलोपादेशाशाद्यभावादिरूपैः
प्रकारविशेषैः बहुनाम प्रतिपादिकं पदं स्तुवंतं साधयितुं कर्तुं निष्पादयि
तुं तावत् अतीतरां क्षमा समर्था स्यात् भवति साव्यक्तिः प्रथमाभिधेया वज्य
ते ॥ अनया प्रतिपादितार्थ इति व्यक्तिः विभक्तिः प्रथमे सम्भिधेया ॥ अथ च
साधुविभक्तीनां चिंताविचारो यदि क्रियेत तर्ह्येकवचनादिसंज्ञकानां स्वौ
जसां मध्ये या प्रथमा व्यक्तिः विभक्तिः सुलक्षणा सैव अभिधेयेति यावत् ॥ प्रयो
गयोग्यता एकवचनं सु त्सर्गाः करीष्यते इति न्यायेन सुविभक्तिरेव वि
धेयान्तवृत्तीति भावः ॥ २३ ॥ राजेति ॥ श्रितश्रोत्रियसादाश्रितश्छंदोध्या
य्यधीनदेवीश्वरताश्रीलक्ष्मीर्येन सः पञ्चानि छिन्नेष्टवान् स राजा न
लः अध्वरे यज्ञे पदाज्यं [illegible] च्यूतं देवसमूहाधीनं देवीश्वरं तं तस्य घ तस्य
उपमयैव दृष्टांतेनैव उपभोगेनैव राज्ये विबुधानां विदुषां व्रजः समू
हः तदयतं देवीश्वरवासं पाद्य श्लो कोऽत्र क्रमाच्चैतया पूर्वं अध्वरराज्यं प
शेषाज्यं शेषं कृताव शेषं अंशं राज्यमशेषं सकलमपि भुंक्ते ॥ इसकोआ

॥ ८ ॥

श्चर्यं ॥ यत्पूर्वं भुज्यते तत्तद्रोषं न भवतीय यस्याः भुज्यते तत्तद्रोषमिति लो
कप्रसिद्धिः ॥ अत्र तु विपरीतमित्यहो आश्चर्यं ॥ देवसमूहात्प्राचीनदेयीस्व
तस्य यज्ञं च तस्य उपभोगं यथा करोति ॥ तथानिद्धतस्त्रनाथस्तिस्वस्तस्य
राज्यस्यापीति भावः ॥ यज्ञे दक्षिणात्वेन श्रोत्रीयेभ्य एव दत्ताराज्य स्नोग
स्मृतिविद्धज्ञानैः सहेति ॥ विबुधब्रजत्रेसनेन श्रोत्रियस्यादिस्वस्य न पौन
रुक्त्याशंका ॥ जन्मना ब्राह्मणो ज्ञेयः संस्काराद्द्विज उच्यते ॥ विद्यया या
ति विप्रत्वं त्रिभिः श्रोत्रीय उच्यते ॥ इति मुख्यत्वात्पृथगुपादानं श्रोत्रीय
स्य ॥ अथ च सर्वजनोपभोग्यत्वादध्वनि मार्गे एव यत्र राज्यं तत्साम्ये ने
वोपभुंक्ते इति समस्तराज्योपभोग एवाश्चर्यहेतुरिति ॥ अनेकयज्ञकारी
समुद्रावध्धी राज्यस्य चाय भुंक्ते इति भावः ॥ यज्वा तु यज्ञोऽनीषु ॥ राज्यो
पमयेति षष्ठीसमासः ॥ भुंक्ते उपभोगस्य विवक्षितत्वात् स्त्रियं भुंक्ते इ
ति चत् ॥ भुजोऽनवन इति तङ् ॥ श्रिता स्वयमाश्रिता फलिता इति कर्म
णो क्त प्रत्ययः ॥ समर्थनीय श्रोत्रीयः छंदोऽधीते इति श्रोत्रीय शब्दः सा
धुः स्त श्रोत्रियतीऽस्ता नवान्न दीना भानवानिकभावाः ॥ २४ ॥ दारि
द्रेति ॥ के नाम लोकाः तं लोकनाथं राजानं नेलं दृष्ट्वा निहितानि धना
दिनी न नाथं तिनयाचंते अपि तु सर्वे ॥ यांच्याकारदोहेतु गर्ता विरो
धुणानि ॥ किंभूतं बहुलेन दारिद्र्यदारिद्र्यस्तिः दारिद्र्यवनाशकैः श्रवि
णोपचवर्षैः । धनसमूहवर्षैः स्वादर्पितसार्थैर्याचकसमूहे अमोघं सफलं

वेदविद्यया
न तु ज्ञानात्र
विद्यया ६

मेघवृन्दं यस्य ॥ जलदा यथा जलवर्षैर्लोकं सुखयन्तीति तथा धनवर्षैरयं ॥
तथा संतुष्टमवदानैः संतोषयुक्तं सहजो लोहयुक्तं वा ॥ तथा इष्टदेवं इष्ट
यजिकर्मिस्तास्वायेन इष्टाः प्रियाः यस्येति वा ॥ दृष्टो हि तस्थासो देवोरा
जा च इष्टदेवतारूपं वा नामेति समर्थ शिरश्चालनेन दृष्टि अनागार्थे धन
दानशीलत्वात्सर्वोपि तं याचत इति भावः ॥ अथ च प्रसन्नं देवं ब्राह्म
णं इंद्रं वा धनानि सर्वे प्रियाचंते ॥ नाथिधिया अचौदि कर्मकः ॥ आशि
षेव तं ऊं नियमादत्र परस्मैपदं ॥७२५॥ अस्मादिति ॥ सा रमणीयस्वरू
पा रंभादेवांगनानलस्य अतुलां लोकत्रयेप्यनुपमां भां कांतिं ॥ अस्म
सकाशात् चिरं श्रोत्रसुधां कर्णामृतं विधाय दत्वा बहुकालं सादरमा
कर्ण्य तत्र नलेनुरक्ता सती तं नलं अनाप्य किल अप्राप्यैवं ॥ तस्य न
लस्य नाम्नो गंधात् लेशात् नत्वनुरागात् नलकूबरं कुबेरपुत्रं भेजे ॥ ॥८॥
प्राप ॥ नलकूबरनामापेक्षया तस्य लेशगंधात् संबंधादिति वा व्या
॥८॥ ख्येयं ॥ अन्योप्यभीष्टनरस्य प्राप्तेरभावात् केनचिद्गुणेन तत्सदृशमन्ये
द्वस्क्तजते ॥ गंधो गंधक आमोदे लेशे संबंधगर्वयोरिति विश्वः ॥ अ
नाप्यन्यत्र आङ्प्रश्लेषाद नञ्पूर्वत्वात् ल्यप् ॥२९॥ ॥ स्वर्लोकमि
ति ॥ केलिषु नलसुखासिका वेला सु क्रीडा सु च तस्य राज्ञा नलस्य गा
न गुणान् माधुर्यादिगुणान् निपीय सादरमाकर्ण्य इतः भूलोका
त् स्वर्लोकं प्रयातैः अस्माभिः कर्तृभिः गायन् गायतीति गायन् हाहा

नं:
संज्ञकोऽहरिगायकः इंद्रगायको हाहेतियत्तज्ञ्रोचिहाहाकष्टं कष्टमि
तियस्मान्निंदितस्तेनैवकारणेन सहरिगायनो नाम्ना हाहाएवाभूदि
॥ततःपरं हाहेनामाभूत्॥ तेनैव नाम्नेति वा हाहा हा हूहूश्चैव माघा
गंधर्वास्त्रिदिवौकसामित्यमरः॥ गायनःप्रपुद्दचेति रायद्रु॥२४॥ ॥
श्टण्वन्निति॥ लोकपालः इंद्रपालः पुलोमजाया इंद्राण्याः लोमतस्या
एवपुण्येन नालोकतन पश्यति स्म॥ किं कुर्वन्सदारः सन् इंद्राणी
सहितः तस्य नलस्य उदारत्तावं वदान्यत्वं श्टण्वन् आकर्णयन् मुहु
र्वारंवारं हृष्यत्सरोमांचोऽभवत्॥ अतएव तत्प्रेमना पश्यत्॥ इति वा मु
हुः वारंवारं चाप्य हृष्यन्नितिरोमविशेषणं वा अनवलोकने हेतुग
र्भविशेषणं॥ तथा प्रमोदबाष्पैः आनंदाश्रुभिः आवृतान्यासा ने
त्रमाला नेत्रपंक्तिर्यस्य सः॥ इंद्राण्या नलगुणानुकर्णनोद्भूतः रोमां
चं इंद्रः नेक्षत्॥ अद्भुतौदार्यश्रवणरसावेशात् रोमांचावेशः॥ तद्
र्णनेत्राकस्य श्टंगाररसाधिकत्वं का स्यात्तर्हि असतीत्वासागं करि
ष्यतीतत्॥ तस्योदार्यातिशयः सूचितः॥ अदर्शने हेतुद्वयं॥ बाष्पेण नी
त्रनीमिलनं च तस्याः पुण्यं च॥२५॥ सापीति॥ सापि पातिव्रत्येन प्रसि
द्धापि अपर्णा पार्वत्यपि कंडुयनकैतवेन व्याजेन अंगुलिनिरुद्धश्रव
णा कदा न भूत्॥ अपितु सर्वदैव जाता॥ कस्मिन्सति॥ ईश्वरेत्रोऽपो
प्रसह्य बालात्कारेण चेनोंतः करणं हरतः वशीकुर्वतः नगुणोघान्

नलगुणासमूहान् शृण्वती सादरमाकर्णयती सती ॥ किंभूता अपर्णा अ
र्धशरीरार्धं शंभूर्यस्याः सा शंभोः शरीरार्धं वा एकदेशीसमासो वा ॥ शंभो
र्धशरीरत्वात् अन्यत्र गंतुं अशक्यत्वात् तद्गुणश्रवणेन सात्विकभावरो
मांचाद्युत्पत्तेः ॥ पातिव्रत्यभंगभीत्या च शंभुर्ज्ञास्यतीति भीत्या च तद्गुणव
र्णनप्रस्तावे कंडूयनव्याजेन कर्णौ निरुद्ध्येत्यर्थः ॥ अपरोक्षिनेन श्रु
(?)पर्णस्यागतपरस्य वा शंभुप्राप्त्यर्थं यतमानया तया पातिव्रत्यभंगभीत्या
कर्णरोधः कृत इति भावः ॥ २९ ॥ ॥ अलमिति ॥ धर्मविध्यौ संध्यादिक
र्मीकरणे सज(?)न्सक्तः सन्नपि धाता ब्रह्मा मौनमिषेण अलं अत्यर्थं वाणी
आवृणोति ॥ बहिर्निर्गता पुरुषांतरं भजेदिति शंकया मौनं करोति न तु ध
र्मार्थमिति भावः ॥ यत्करणद्वितत् अलं वृथा इति वा वैयर्थ्यमेवाह ॥ स
ब्रह्मा तत्कंठं नलकंठं आलिंग्य आश्लिष्य रसस्य शृंगारादिनवरसैः त्त्व सां
संपूर्णां नवकाव्यकोटिरूपां तां वाणीं नैव वेद नैव जानाति यतो वेदजडः ॥९॥
सदैव वेदपाठव्याकुलीभूतहृदयः ॥ निरुद्धापि कदा निर्गत्य नलकंठमा
लिलिंगेति नाज्ञासीदिति भावः ॥ अपरश्च वेदं जडत्वात्तं विहाय अनुरागात्
नलकंठमालिंग्य शृंगारादिपूर्णाभित्यर्थः ॥ अन्योऽपि स्वस्वादु(?) सः विरक्ता
मनुरक्तां वा स्वस्त्रीयं न जानाति ॥ पुरस्तात्गुणेति सुहितार्थयोगे षष्ठी
समाससनिषेधात् देवरस्य संति तृप्त्यर्थकत्वात् षष्ठी ॥ ३० ॥ ॥ श्रिय इति ॥
पतिव्रतायाः श्रियः शोभायाः छलेन राज्यलक्ष्मीः छलेन च तदालिंग
नं नलालिंगनं तस्माद्भवतीति भूः कापि व्रतक्षतिः पातिव्रत्यक्षतिः न

भूतान जाता ॥ तस्याः लक्ष्म्याः भर्तुर्विष्णोर्नलालिंगनेन लक्ष्मीविषये
ईर्ष्यासहिष्णुत्वलक्षणया कलुषं कालुष्यं तस्य अणुलेशः तेनापि न भूतं
न जातं ॥ पातिव्रत्यसहिष्णुस्वभावेत्यत्र तु ईर्ष्याभावे कालुष्याभावे च हेतुमा
ह ॥ समस्तभूतात्मतया विष्णोः सकलभूतस्वरूपत्वेन समस्तानां भूता
नां आत्मा स्वरूपं विष्णुस्तस्य भावस्तत्ता तया नलोपि विष्णुरेवेति तदा
लिंगनेन पातिव्रत्यस्याक्षतिः ॥ विष्णोरीर्ष्या च नाभूदित्यर्थः ॥ सदाकांति
संयुक्त इति भावः ॥ कलुषशब्दोत्र धर्ममात्रपरः ॥ असूयानिमित्तपा
पलेशो नापि न भूतमिति वा ॥ पक्षे क्षार्थ भर्तृशब्दस्य याजकादित्वात्
षष्ठीसमासः ॥ ३१ ॥ धिगिति ॥ हे भैमी स्मृतानतस्य नलस्य मुखेन श्री
र्येन एवंभूतो पियो विधेः ब्रह्मणः पाणिः हस्तः पर्वणि पूर्णिमायां पूर्णं
सकलंकं चंद्रं निर्मीते सृजति अतएव अजातलज्जं निर्लज्जं विधेः पाणिं धि
क् ॥ तज्जैत्रेण नलाननेन सः पियः करः तस्मात् हीनं पूर्णचंद्रं निर्मीते ॥
स निर्लज्ज हास्तिन्निंद्य एव स विधेः पाणिः विज्ञः कुशलः सकः यः स्वतन्नला
ननशोभः सन् स्वतार्द्धं स्रतैकदेशामपितं चंद्रं हरमूर्ध्नि शिवमस्तके औ
ष्ट्रसत् तस्या जन्म सह मन्ये ॥ प्रारब्धमपितदुत्तमस्यान्यस्य स्मरणात्त्य
जति स विपश्चिदेवेति भावः ॥ पूर्णकलंकचंद्रं यद्यप्येकपव ब्रह्म
णः पाणिः निर्मीते तथापि कार्यत्वे तन्मुखं विज्ञत्वं कालभेदादुपचर्य
ते ॥ चंद्रादप्यतिरमणीयं तदाननमिति भावः ॥ ३२ ॥ निलीयइति ॥
हे भैमी विधुश्चंद्रो नोस्माकं मुखात्तस्य मुखं स्वजैत्रं स्वस्य जेतृ भयात्री

विधुरोलज्जाविकलः सन्न कदापि कुत्रचित् अमावास्यायां सूरे सू
र्ये कदापि अस्तमये समुद्रस्य पूरे कदाचित् प्रावृट्काले अभ्रे आका
शे भ्रमंति अभ्राणि मेघास्तेषां गर्भ मध्ये नीलियते अंतर्हितो भव
ति अन्योपि स्वजेतारं भूपालं लज्जाविकलः अलक्षितेषु स्थानेषु नी
लियते ॥ सूरः सूर्यो र्यमादित्यः ॥ द्यौ दिवौ द्वे स्त्रीयामभ्रं ॥ अभ्रं मेघो वा
रिवाहः इत्यमरः ॥ जैत्रे वजैत्रं हंसप्रद्वंघण ॥३३॥ दैसारिर्विधुः स्व
ध्वजस्य गरुडस्य स्वर्गस्य वर्गीनः अस्मान्न असत् जितकमलं नला
स्यं नलमुखं तस्य नुसेस्कतये संज्ञाप्य संज्ञया आज्ञाप्य ॥ धातुर्ब्रह्म
णः सकाशात् द्विलब्धं लज्जारहितं यथा तथा रमायां लक्ष्म्यां रमति क्री
डति ॥ किंभूता भ्रातुः तथा अस्महृतयानलाननस्य नुसासं सच
न्मुकुलीभवन्नासीत् सरोजं नासीत् कमलं तेनापिहितात् अंतर्हिता
त् अपश्यदित्यर्थः ॥ अलुभमतिक्रांतं अयमेव मुकुलीभवने हेतुः ॥ ॥१०॥

॥१०॥

तवस्तोत्रं नुति स्तुतिरित्यमरः ॥ पश्यतो वक्त्रस्य समक्षं स्त्री क्रीडा
लज्जावता ॥३४॥ रेखास्मिसिमिति ॥ येषां अस्य नलस्य अंतः आस्ये मु
खमध्ये द्वात्रिंशत्संख्याकाः दंतमपीसि दंतशाता द्वात्रिंशद्रूपाः तिः
रेखावाप्तिः गणनांक संख्यानं लब्धाद् इति शशांसेव कथयतिस्मेव ॥ इ
तीति किं ॥ अत्र नलमुख मध्ये वद्वैधास्वतंत्रा स्यांद्वात्यामपि भका
र्दंष्ट्रयां चतुर्दश अष्टादशा च विद्याः संतीति ॥ दंतानां रेखाल निरू
पणं सूक्ष्मत्वेन सामुद्रिकलक्षणत्वद्योतनार्थं दंता द्वात्रिंशद्वदंत

इतिभावः॥ विद्यानां चतुर्दशत्वमष्टादशत्वं च प्रथमसर्ग उक्तं॥ विंशत्संख्याः सदैकत्वमिति द्वात्रिंशत्संख्यादौ बहुवचनांत विशेषणं॥ गणनात्तुल्येकत्व पू॥णोपेपंचमी॥ द्विधासंख्यायां विद्यार्थे धाइ तिधाप्रत्यय स्मरूपए धाच्छेसे धाकू॥ ३५॥ श्रियाइति॥ हे जैमीव यंतस्य नरेंद्रस्य श्रियो शोभा समृद्धिनिरीक्ष्य इक्ष्वा स्मरामरे शावपि न स्मरामः अंतःकरणगोचरीन कुर्मः॥ मदनकांति रेव इंद्र च समृद्धि रेव नले चद्वे अपीति आधीक्यं॥ तस्मिन्नले क्षम यो: भूक्षांशो: सम्यग्व्यासेन वसत्सा खलु॥ निश्चयेन शोषबुद्धौ अनंतस्तू तताव पि बुद्धौ चित्तेन दध्मः॥ मनसापि न स्मरामइ सर्थः॥ नयोरेकैकं क्षमा धास्वं अवत्रय च द्वयोरप्याधारत्वमत स्तयोस्मरत्तां न॥ ताभ्यामयमधिक इतिभावः॥ भूमिक्षांशो: क्ष मेस्मरः॥ कर्मणः शोषत्वं न विवक्षमाष्टाहात् स्मरामरेंद्रावपि स्य अधिगयेतिषष्ठ्यन्तावः॥ ३६॥ विनेति॥ तस्यनलस्याश्वैः कतमादिक्न लंघिता॥ न निर्जिता आसीत्॥ अपितु सर्वापि॥ किंभूतैः पतत्रं पक्षं विना पक्षरहितैः विनतातनूजैः गरुडैरिवैवा॥ तथा ईक्षण लक्षणीयैः नेत्रगोचरैः समीरणैः वायुभिः तथा अणुपरिमाणैः मनोभिः अंतःकरणैः गरुडः सपक्षः वायुरचाक्षुषः मनो अणुपरिमाणमिति प्र सिद्धिः॥ तद्विपरिता अपि तदश्वा वेगेन गरुडादिरूपा जाता इतिभावः॥

वि

द्वयोजना-चकर्त्तव्यानन्निर्जितेतिक्वचित्पाठः ॥ अतिजवादतश्वादितिभावः ॥
कतमाकतरकतमोजातिपरिप्रश्ने इतिश्चार्थेडतमत् ॥ ३७ ॥ संग्रामेति ॥
हे भैमीराजांप्रजाः समूहास्तेषांइमेराजप्रजीयातैः असुभिः नरेंद्रप्राण
रूपैः वायुभिः स्ववातस्यनलस्यबाणधाराबाणपरंपरास्तल्लक्षणांपवना
त्राताः सर्पास्तेषां सुभिक्षंभीक्षासमृद्धिर्जनिति ॥ नलबाणैः सर्वेपित्रा
त्रयोहताइतिभावः ॥ कासुसतीषु ॥ संग्रामभूमीषु अरीणां शत्रूणां अ
स्त्रैः रुधिरैः नदीमातृकतांगतासु नदीजलपरिपूर्णतांगतासु सतीषु ॥
वैरीरुधिरनदीपरिपूर्णास्विसर्थः ॥ तद्देशेणाशुगामित्वेन बाणानांपव
नात्वात्त्वं प्राणानांपवनत्वात् तैरेवतेषां सुभिक्षमितिभावः ॥ नदीमा
तृकासु भूमीषु अवग्रहादिसद्भावेपि सुभिक्षंभवति ॥ देशोनद्यंबुवृ ॥११॥
ष्ट्यंबुसंपन्नव्रीहिपालितः ॥ स्यान्नदीमातृको देवमातृकश्च यथाक्रम ॥११॥
मिस्यमरः ॥ नदीमातृकइतिनद्यतश्चेतिकप् ॥ राजप्रजीयेतिवृद्धाछ
छः ॥ सुभिक्षंभीक्षाणांसमृद्धिः अव्ययंविभक्तीत्यव्ययीभावः ॥ ३८ ॥
यशाइति ॥ कंडुलभावंरणकंडुसहितत्वं भजताप्रासवताभुजेनसंयुगेषुयत्
अस्यनलस्ययशः अजनिसंपादितंतत् नदीयंयशः संबंधीदिशाएवापगा
नद्यः तासां अलीपंक्तिः तस्याः कूलंतीरं तत्र कषपटंकषत्वभावस्तद्रूपं
व्यसनं हेतोः कारणस्य गुणादेवजातमितिशेषः ॥ तत्तुसभावतः यशः
कारणे भुजे विद्यमानात्कंडुलभावलक्षणात् कारणगुणादेव यशसि
कूलंकषत्वरूपव्यसनमागतमिति भावः ॥ तस्ययशः सर्वदिग्व्यापी

सर्थः॥ कंदूलेति सदश्मादित्यस्य ओतिविथैलिम्न्॥ कंदूला प्रादत इति भावः॥
अतोनुपसर्गेकि॥ कूलंकष इति सर्वकूलेति रवतिा अजंतत्वात्खमुम्॥
॥३७॥ इदानीं तस्य गुणानुवर्णने नाशक्तिं द्योतयन् अतिशयोक्तिमा
ह॥ यदीति॥ त्रिलोकी त्रैलोक्यं यदि गणना परा गुणगणनासक्ता स्या
त् तस्यास्त्रिलोक्याः तद्गुणगणनार्थं आयुषः समाप्तिः यदि न स्यात् यदि ग
णितं गणितशास्त्रं पारेपरार्द्धं परार्द्धात्परं यदि स्यात् तदा नलः गुणेयागणपि
तुं शक्या निशेषाः समयागुणाय स्येवं भूतोपि भवेत्॥ नतु एवं नतः सो
प्यसंख्येयगुण इति भावः॥ त्रिलोकी समाहारं द्विगोर्हि गोस्त्रियुति ङीप्॥
पारेपरार्द्धं पारेमध्येषष्ठ्या इति समासः॥ एवं न वनि पादनात् गणे यदि ग
णेसोणाकुदि कोगणेदयः स्यात् क्रियाविपत्तेरविरक्षिताभ्यादि लुङ्॥४०॥
तस्यांतःपुरे स्वर्गीतिं द्योतयन्नाह॥ अवारितेति॥ हे नैमी परमाणुवन्मध्या
यासांताः अतीस्त्रोदरीः कर्मभूताः स्वतः एव रम्येषु गतेषु गमने सुविष
ये अधिकं लोकोत्तरगमनविशेषं अध्यापयामः पाठयामः॥ किंस्त्वा॥ ति
रश्चां पक्ष्यादीनां अवारितद्वारितया अनिषिद्धद्वारत्वेन तस्य राज्ञः अंतः
पुरे निविशस्य प्रविशस्य॥ इङ्-शब्दकर्मत्वादिति सु॥ द्वीति अण्यंतकर्तुर्ण्यंत
स्य कर्मत्वं॥४१॥ नर्मसाचिव्यमपि कर्म स्मर्म इस्याह॥ पियूषेति॥ वयं रंभा
दीनां अप्सरसां सौभाग्यपुरुषवशीकरणादिशक्तिस्तस्य रहः रहस्यं तस्य
कथाभिः संभोगगोष्ठीभिः वस्त्वंतरगोप्यकथाभिश्च तासां नलस्त्रीणां अं
पीयूषधारा अमृतप्रवाहस्तस्याः सकाशादनधरोभिः अन्युनाभिः तथा

काव्येन [illegible]ऋेण आदृता भिः काव्य
काव्यंप्रबंधविशेषंसृजताकुर्वता॥काव्येनेत्युघेध्वेति धुः॥तत्रनिमज्जनं
प्रतिपादिताभिः उदन्वंति॥उदन्वादन्तुघेध्वेति॥ ॥४२॥स्वस्यविश्वासलंवदन्नआ
पुत्तं॥रहः स्फुरतगोप्यवारितिविश्व॥ ॥४२॥स्वस्यविश्वासलंवदन्नआ
देशाह्विमाह॥काभिरिति॥तत्रनलांतःपुरे काभिःसुंदरीभिः अहं पक्षी
अभिनवा अतिगोप्यास्मरज्ञातस्याः विश्वासेननिःक्षेपणेनवशीकृस्य
पशीकोवणिकृनक्रियेअपितुसर्वाभिरपिस्ततःकथावास्वकामरहस्यं
मपिनकथ्येत इत्यर्थः॥तत्रहेतुःयद्यतोहेतोः तिर्यक्पक्ष्यादिः कुतोकस्मा
दपिप्राणिनोनेवजिकेतिनलज्जेतितेनकारणेनकस्मिंचित्कोपीप्राणितिर
श्चोपिसकाशात्नत्रपतेनलज्जते अतस्तानिर्लज्जाःसस्तःमदग्रेअतिगो
प्याअपिकामगोष्ठीःकुर्वती।ंतितावः॥अन्यदपिगोप्यंविश्वासयोग्यव

॥१२॥

णिजनिक्षिप्यते॥४३॥तासांपितदुक्तमलीकमपिवचोनान्यस्मैकथ

॥१२॥

यामिसाह॥वार्त्तेति॥असत्यपिअलीकापिसापरिहासवार्त्तापिपरिहास
कथापि अन्यंनैति अन्यस्मैनकथयामीत्यर्थः॥साका अरंध्रे अरिस्ते
दरहितेहृदियोग्यादुपायेनप्रयत्नादित्यर्थः॥ यांवार्त्तांनिरंध्रेनितरामा
वृणोमि॥ध्यानादिसंबंधादोषरहीतेहृदीतिभासदोषमेवांतःकरणं
अन्यस्मै अन्यवार्त्ताकथयति॥मदंतःकरणंतुध्यानादिनिर्दोषं अ
तोनकथयामितिभाः॥वार्त्तापिअन्यंनैतिकीमुतोन्यत्अलीकापिअ
न्यंनैतिकिमुतसत्येतिद्योतनार्थं॥अपिनाद्यो॥इष्टप्रयुक्तावार्त्ता
जनहितार्थंकथनीयामपिनकथ्यते॥सरंध्राद्धादेवबहिर्निर्गमः॥
संभाव्यंते॥इदंतुअरंध्रं॥अथवासतीकुलदापिकर्मादियोग्यानिरं

प्रस्खलेनिरुह्यंपप्यन्यं पुरुषंमेतिइत्युक्तिः॥योगत्वमेवा॥वरंचितिं॥विरं
चेःब्रह्मणः नानानननानिचत्वारिमुखानितत्स्तोवा दीवचनंतेनप्योतं
पवित्रीस्त्तंसमाधिशास्त्रंतस्यश्रुतिःश्रवणंतेनपूर्णौकर्णौयस्ययोगशा
स्त्राणिश्रुतयश्चेतिवा॥योगिनोहियत्चक्षुत्रापिनजल्पंति॥तथाब्रह्मणः
उपदेशादहमपि॥त्वमपिवयःसंधिप्राप्ताविश्वासाहैमेमयीविश्वस्यकां
मगोष्ठींकुर्वीथतिभावः॥रुद्रेस्वरितेतत्वातउ॥७४॥अतिशयितमभिला
षमुद्घाटयितुंनलप्राप्तिदुर्लभत्वमेनाह॥नलेति॥हेभैमीतवलयाअन
वाप्यंदुःप्राप्यंअस्मत्कर्तृकायामपक्षविजनादिसेवारूपंत्रिदिवोपभो
गंस्वर्लोकोसम्नं॥नलाश्रयेणसखा अन्यानायिका अनर्हापिलभते॥
बतखेदेहाहाकष्टंप्राप्यते॥वतमानेस्योमिथ्यैलद्रूः॥प्राप्नोतिवानहुवलभ
त्वादितिवा॥केव अंबुजिन्याकमलिन्यादुर्लभंदुःप्रापंज्योत्स्नाश्रवंचंद्रि
काजन्यंविकासादिरूपंमहोत्सवंइंदुपरिग्रहेणचंद्रांगीकारेणकुमुद्वती
वयथालभते॥अन्यस्यानर्हत्वादेवमेरवेदः॥स्वस्त्रोगसिध्यैनलपरिग्र
हस्त्वयासंपाद्यइत्यर्थः॥नहितंविनावयंअन्यंभजामइत्यर्थः॥तवस्तुयो
गेस्त्संज्ञानामितिकर्त्तरिषष्ठी॥अंबुजनीखलर्थयोगेषष्ठीनिषेधात्कर्तरी
त्ततीया॥७५॥प्रस्तुतमुपसंहरन्नाह॥तदिति॥तत्तस्मात्त्वयानैषध्येनअस्मत्
दूतयाआपरिणितत्वेनअस्माकिःस्तुतंपश्चाद्प्रीयंवचनंतस्मात्जन्मयस्य
त्रार्मस्तुस्वंदुरापंदुःप्रापंनलाश्रयेणैवत्वयापिअस्मत्प्रियवचनजनीतस्तु
खंप्राप्तव्यं॥नान्यथेतिभावः॥कथाकमिव॥अप्राप्तवसंतयारसालवन्या
सहकारवाटिकयामधुपैःभ्रमरैःअनुविद्धस्तंसौभाग्यमकरंदास्वाद

प्राकारगुंजनादिलक्षणमिव यथा दुःप्रापं॥ पूर्वश्लोके अंबुजीनीदृष्टं
तेन सर्वथा दुःप्रापत्वं सूचीतं इदानीमाम्रकनीदृष्टांतेन कालांतरे प्राप्स्यते
इति सूचितं॥ खलार्थं योगेवल्लोकेति षष्ठी निषेध्यः॥ ५५॥ तत्र नलप्राप्ति
संभावनायाम धैर्यं न कर्त्तव्यमित्याह॥ तस्येति॥ त्वं तस्यैव नलस्यैव हस्तं
प्राप्तासि अपि त्वेवमपि संभाव्यते॥ सर्वथा त्वं नलं प्राप्नोषीति निश्चेतुं
न शक्यत इति पूर्वत्रापरितोषद्योतको वा शब्दः॥ निश्चयाभावः कथम
त आह॥ केन पुरुषेण विधेः ब्रह्मणः मनः अंतःकरणं प्रविश्य दृष्टं ज्ञातं
मैम्या नलो न प्राप्स्यत इति अपि तु न केनापि एवं सति कदाचित्प्राप्तिसं
भावनापीत्याह॥ तावत् आदौ त्वं न जातपाणिग्रहणांविवाहो यस्याः सा एवं
भूतासि वर्त्तसे प्रथममेव नैराश्यं न कर्त्तव्यमित्यर्थः॥ मम योग्यताभाव
श्चेत्तर्हि तत्प्राप्तिः कथं स्यादित्याशंक्याह॥ रूपस्य लावण्यस्य स्वरूपेणैव त्र
लंकारं अंतरेणैव स्वाभाविकोतिशायः तस्याश्रयः स्थानमसि॥ सहजसौं ॥१२३॥
॥१२३॥ दर्येण नलप्राप्तिरपि तव संभाव्यतेति भावः॥ ५७॥ स्वस्वरूपत्वात्तस्याः
नलप्राप्तिं दर्शयति॥ निशेति॥ निशाशास्याशशांकं चंद्रं शिवया गोर्यां
गिरीशं श्रिया लक्ष्म्या हरिं विष्णुं योजयतः संयोगं प्रापयतो विधेरपीव ब्र
ह्मणोपि स्वारसिकः स्वेच्छाकारि प्रयासः प्रयत्नः परस्परं मिथः योग्ययो
समागमाय मे नलाय प्रतीतः ख्यातः॥ पूर्वोक्तदृष्टांते न ब्रह्मा स्वरसत एव
परस्परं योग्ययोरेव समागमं करोति न त्वयोग्ययोरिति॥ अतो नलमपि त्वयैव योज
यिष्यतीति भावः॥ स्वरसेन चरतीति स्वारसिकः॥ चरतीति ठक्॥ स्व शब्दस्य
द्वारादिषु पठतीत्वात् तत्र तदादि विरच्येरन्ज्ञानात् स्वारसिक इतिय

यद्यपि भवितव्यं तथापि स्वगतादिषु दर्शनात् ॥ स्वाप्निकस्याभाविकादिनाप्य
कारप्रयोगं दर्शयन्नन्यत् द्विरेवेति ज्ञेयं ॥ एवमन्यत्रापि द्रष्टव्यं ॥४८॥
अन्यं निराकरणोन नलस्येव तं योग्येत्याह ॥ वेलेति ॥ वेलां मर्यादामतिक्र
म्य एवंभूतो यस्त्रैणः स्त्रीसंबंधी यः गुणाब्धिः सौंदर्यादिगुणसमुद्रस्य वे
णीः प्रवाहरूपा ॥ समस्तस्त सौंदर्यादिगुणभाजनं त्वं नलादितरेण सहयो
ग्ययोग्या संबंधयोग्या नासि न भविष्यसि यतः स्रक् मल्लीमालापुष्पमा
लास्रक् कर्कशेन अतिकठिनेन दर्भगुणेन कुशनिर्मितदोरकेण सह न
संदृश्यते न संग्रथ्यते मल्लीमालायाः कुशदोरकेण गुंफनमनुचितं त
थात्र नलव्यतिरिक्तेन योग इति भावः ॥ वेणी नदीप्रवाहे तु च्छोचय इति
क्षीरस्वामी ॥ स्त्रिसंबंधिनः स्त्रिगुणाः स्त्रीपुंसाभ्यामिति षष्ठी वेणी इति सं
बंध्यत वा ॥ तत्र न ग्रंतव्या द्रस्व ॥ म्रद्विवीतो गुणेतिडीपू ॥४७॥ तस्या नलप्रा
प्तौ प्रकारांतरेण हेतुमाह ॥ विधिमिति ॥ अहं तस्य विधेः यानं विमानं तस्य
धूर्यो भारवाहकः सन्नम नलकेलिर्नलक्रीडायाः योग्यामुचितां वधूं स्त्रियं न
लक्रीडायोग्या काल्पयानिमितेति ॥ स्त्रीसृष्टिं विधिं ब्रह्माणमपृष्टमेव पृष्टवाने
वतेन किमुत्तरं दत्तमिसत आह ॥ नलकेलीयोग्या भैमी रचितेति तव नाम्नोव
र्णाद्वयकर्णाभ्यां पीताः उत्तरत्वेन मया श्रुताः ननु सम्यकू एव किमिति न श्रुता
इत्यत आह ॥ कस्मिन्नति ॥ अस्य ब्रह्मणः चक्रिणो रथस्य चक्रे संक्रीडति स
ति रथांगकूजनेन सम्यक् नाकर्णि इति भावः ॥ यदि निश्चयेन नाथ श्रूयेत्
तदा स्वत एव कार्यसिद्धेः सादर्पस्वस्मिन् सादरानभविष्यतीवाशब्दप्रयोगः ॥

चक्रिय क्के हं सम्न हे इतिर्कच्चित् ॥ पूज्यः तद्दहं तीति यत् ॥ सं क्रीडंतिस माहकू
जने तिप्रतिषेध्या ॥ ५० ॥ ब्रह्मणः स्ववचनान्यथाकरणेबाधकमाह ॥ अ
न्ने नेति ॥ वाच वाणिश्च्यूये ब्राह्मपि अन्येन नलातिरिक्तेन पसात्तत्रीयोजि
तायां सत्यां विज्ञत्वकीर्त्तिः सर्वज्ञत्वं तवैव अतं अतिक्रांतं जन्म यस्य एनवा
एवंविधस्य विधातुः जनापवादएव अर्गा वस्तं सर्वज्ञेन ब्रह्मणा इदम
नुचितं कथमकारि इति लोकापवादस्समुद्र स्तुत्तरितुं कतमा विधा प्रका
रः ॥ तरी नौका स्यात् अपि तु न कापीत्यर्थः ॥ सकलेनापि जन्मना यत्स
र्वज्ञत्वं ब्रह्मणार्जितं तदेकस्यास्त वान्यथाकरणे तदेव गमीष्यतीति त्वि
या नलेनैव योजनीयेति भावः ॥ समुद्रं तरितुं काचिन्नौर्नास्ति जनापवा
दार्णवं तरीतुं न कापीत्यर्थः ॥ स्त्रियां नौस्तरणिस्तरिरित्यमरः ॥ उत्तरी
तुं वक्तो वेति दीर्घः ॥ तर्यते अनेनेति तरी तरं रंसन यातरि अविहस्त्तरं

त्रिस्यः ॥ ५१ ॥ अप्रियप्रायं ज्ञात्वा तमुपसंहरन्नाह ॥ आस्तामिति ॥ हे नै
मितनूनलवर्णानं तवतद्योगाप्रतिपादनं च आस्तां तिष्ठतु ॥ न कर्त्तव्यमित्यर्थः ॥
यतः प्रस्तुतस्यचितयाकथयाअलं निःप्रयोजनत्वात् ॥ हे तन्वि मया हं अतिदू
रान्नयनादतिवलेन त्वां अमितासि सोहं तव आगरपराधं परिमार्ष्टुं कामः
अपनेतुकामः सन्नत वकिंप्सितं कं मनोरथं विदध्ये करोमि अभिधे
हि ब्रूहि ॥ अप्रस्तुतचिंतयेति वारणार्थं तृतीया ॥ ५२ ॥ इतीति ॥ राजपु
त्र्या भैम्या हृदयेन लानुरागो विद्यते न वेति मनोबुभुत्सुः जिज्ञासुः सः
पतत्री हंस इती पूर्वोक्तं मीरयीत्वा उक्त्वा विरराम तूष्णीं भूवैत्या ॥ नन्तुन
लानुरागस्त्वयि विद्यते त्वमपि नलेनुरक्तास्तवेति प्रकटं किमिति नोक्तवा

निसत आह ॥ क्रियस्मा द्रुतीरेगांभीर्यफक्ते क्रदे जलाशयशाये गुरुणाभि
प्राये हृदि च अवगाहे आलोडिते च ज्ञाते सति ॥ संतः पंडिताः कार्यांव
तरं केरवीणी यं तरणपथं कार्यस्य प्रस्तावं च रां संति कथयंति गभी
रहृदं आलोड्य अश्रोत्तरितव्यमिति तरणमार्गपथानकोपी कथय
ति तथा विशेषमविज्ञाय बुध्यस्तदग्रे कार्यं आशाय प्रस्तावं न करोति
अतस्त्वदभिप्रायं ज्ञात्वा तस्यान लानुरागप्रकाशनं कर्त्तव्यमिति न
लानुरागमप्रकाश्यैव तूष्णीं बभूवेत्यर्थः ॥ राजपुत्रीति हृदयस्य गु
ढाशयत्वं ॥ विरराम इति व्याङ्परिभ्योरम इति परस्मैपदं ॥ हृदयनला
स्तिषष्ठीनिषेधः ॥ ५३ ॥ किंचिदिति ॥ साप्यथिवीं द्रपुत्री भैमी
मुहूर्तं क्षणमात्रं मनसा अंतःकरणेन वाच्यं वक्तव्यं वचनं विचिं
त्य विचार्य पतत्रिणं हंसं जगाद ॥ किंभूता वचनविचारणे क्रियमा
णे किंचिदिषत् तिरश्चिनी वक्रः विलोलः मौलिर्यस्याः सा तथा च स
हजसौंदर्येण अभिलाषसिध्याशापातिप्रसन्नत्वेन वक्रेण मुखेन
न्यणीकृत इंदुश्चंद्रो यया सा ॥ तिरश्चिनो विलासार्थं चेति दिक् ॥ स्त्रीया
मिति स्वार्थे रवः ॥ पुत्रीति शाङ्गरवादिपाठात् ङीष् ॥ ५४ ॥ आत्मेऽनु नो
चितकारित्वमाह ॥ हे हंस चापले चंचलत्वविषये पत्नवल्लिम वत्सलत्वं
वत्सस्य बालस्य भावो वत्सिमा बालत्वं तेन यद्वत्सलत्वं सस्नेहत्वं बाल
त्वेन चापलत्वेन चापलविषये यत्प्रीतिमत्त्वं चापलांगीकरणमि
ति यावत् तद्दिक् ॥ निंद्यं अनुचितं ॥ यतः यस्य चापलस्य प्रेरणात्

नियोगात्त्वदधीनतया उत्तलीनवंसा अतीतायेन चंचलीनवं
सा मया पश्चाल्लगितत्वात् तटस्थ: उदासीनस्त्वं उपद्रुतोपीडितोसि॥
कयेव समीरसंगाद्वा पुंसंबंधाच्चंचलीभवंसो नीरसंगेव तरंगरू
पया उदकरचनयात टस्थ: कूलस्थ: अथोपद्रूयते॥ निरपराध
स्त्वं पश्चाल्लागितत्वात्मया पीडितो अनुचितकारिण्येवेतिभाव:॥
वल्लशब्दात्पक्ष्यादित्वादिमिति॥ तस्मादेवेत्साव स्यामि सखिला
षवल्लच्॥ तथा च वचवलसलइति स्नेहवानुच्यते॥ ५५॥ आत्मनिं
दापूर्वकं हंस स्तुतिमाह॥ आदर्शेति॥ हे हंस संदर्शनीयोतिरमणि
यस्त्वं खलु निश्चयेन उत्प्रेक्षावा॥ स्वच्छतया निष्कपटतया स्वच्छासतां
साधूनां तावत्प्रथमं आदर्शतां दृष्टांततां प्रयासि प्राप्नोषि॥ किंवदयं
निष्कपट इति प्रस्तत्वमेव प्रथमं दृष्टांतयोग्योसीति भाव:॥ अथच नी
र्मलतया दर्पणतुल्योसि दर्पणोपि सतामवलोकनीय:॥ श्रीकामै: प्रा
तरवलोक्यते च॥ निष्कपटतामादर्शतां च समर्थयते॥ पश्चाल्लगना
त्सागसं सापराधां मां पुरस्कुर्वंति॥ मयासितन्विश्रमितेसादिवचना
त्॥ मां प्रतिप्रियभाषिणी यस्य तवात्मनि स्वरूपे इदमागत: तटस्थ
पीडनलक्षणममापराध:॥ प्रतिबिंबित:॥ सोहंतदागइति वचना
त्॥ एवामदपराध: स्वियत्वेनैव स्वीक्रियते इति सतां स्वभावोयं अन्या
पराधं स्वात्मनि आरोपयति खलु किमर्थं आदर्शतां प्रयासि किं ततो
प्यधिक:॥ यथा आदर्शी पुरोस्थितं वस्तु प्रतिफलति॥ मय्पिल्सापि
राधेव स्तुपुर: स्थितेपि अपराधलक्षणो धर्म: प्रतिबिंबतो ननु

॥१५॥

॥१५॥

29

सापराधो धर्मिसादृश्याद्दर्शनात्क्षमस्व यं रूपो सीति ॥ ५६ ॥ साप
राधां निश्चितस्तत्क्षमां प्रार्थयते ॥ आज्ञाचेदिति ॥ हे सौम्य त्वं दर्शन
वान्कुमार्या बालाया मम अनार्थमनुचितमपि आचेष्टितं ॥ आचर
णं तावत् प्रथमं क्षाम्यतु सहतां इष्टितं म अत्रोत्तरं तु पश्चाद्दत्तव्यं ॥
अत्रास्य ह्यपराधः क्षन्तव्य इति पदं कुमारी इति ॥ राजपुत्र्या पक्षिणो मम
पि प्रार्थनं मनुचितमिस्सत आह ॥ हंसोपि त्वं देवांशोऽत यावं घोसि पूज्यो
सि देवांशस्त्वं ब्रह्मवाहनत्वान्यथानुपपत्या ततः प्रार्थ्य स इति भावः ॥ क इ
व श्रीवत्सो लक्ष्मचिन्हं यस्मिन्न समत्स्यमूर्त्तिमत्स्यस्य स्वरूप इव विष्णु-
श्रीवत्सचिन्हो देवांशो मत्स्योपि पूज्य तेन त्वां सौम्यः सूक्ष्म इ समरः ॥ दे
वताधिकारे सोमाधणाद्विधानात् सौम्यति चिंसं सोमस्य चंद्रस्येयं सोमी
सुधामर्हतीदं डादित्वाद्यसर्पे सोम्य देवतुल्येस र्वे इति समर्थनीयं ॥ ५७ ॥
दर्शनस्फूर्तिद्वारेण तवेप्सितं किं विदध इस्सस्योत्तरमाह ॥ मदिति ॥ यामुत्
हर्षः मदक्ष्णोः मन्नेत्रयोस्त्वदिक्षामु दंतद्दवलोकनजातमपि हर्षं अतिरो
तामतिक्रमतु तस्मादपि हर्षादधिका भवतु ॥ त्वं तां कां मत्प्रीतिं ममसुदं आ
धित्सैसि आधातुं कर्तुमीच्छसि सा कापि नास्ति एषैव नती प्यधिकेसर्वे ॥ भावः
एतदेव दृष्टांतेन द्रढयति ॥ वाङ्वार्थः ॥ यथा इंदुः निजामृतैः स्वपीयूषैः प्र
जानां लोचनसेचनान्नेत्रसेकात् पृथक् अन्यत् अधिकं किमिव सृजति
अपितु नेत्रसंतोषादन्यत्तु न किमपि ॥ तथोत्वद्दर्शनाधिकं मदीप्सितं किम
पि नेति भावः ॥ अयमत्रिप्रायः ॥ चंद्रस्य नीकानां नेत्राल्हादकरत्वमेव
ननु अमरत्वादिकारणसामर्थ्यं तथा त्वद्दशानामपि दर्शनेन नेत्राल्हाद

ममेवनन्वभिलाषकारणसामर्थ्यमितितस्याभिमानोत्पादनेनानलप्राप्तिप
लमेवनलस्याभिलाषकारणसामर्थ्यमितितस्याभिमानोत्पादनेनानलप्राप्तिप

७

र्यैसायीममसंतोषइतिसूचितं ॥ तस्माद्यथाममनलप्राप्तिस्तथायतस्वेस
र्थः ॥ सेचनाय थ ग्विनेतिपंचमी ॥५०॥ ननुतवकोमनोरथस्तंवदेति
अत्राह ॥ मनस्त्विति ॥ हेहंसमनोरथः कंठपथंकंठमार्गवचनगोचरं
कथंकेनप्रकारेणयातु अपितुनकेनापि ॥ सकः तुपुनः पंअभिलाषं
मनः अंतःकरणंजातुकदाचिदपिनोझतिनत्यजति ॥ अंतःकरणस्याधो
देशात्कंठस्योर्ध्वदेशादित्यर्थः ॥ अथरथोपिगर्त्तपातादिनास्तब्ध
पंथानंअवरति ॥ सर्वत्रापिमनसोगतिसाधनत्वादभिलाषोपिमनसो
रथः ॥ अथचयोवकुमपिनशक्यतेसकर्तुंकथंशक्यतइतिदुःसाध्य
त्वं ॥ तदेवाह ॥ नामसंभावनायां अलज्जानिर्लज्जासाध्यमसाध्यमितिअ

॥१९॥

जानासतीकाबालाद्विजराजस्यचंद्रस्यपाणिनाहस्तेनग्रहाभिलाषंग्र
हणाभिलाषंकथयेत्अपितुहस्तेनचंद्रंग्रहीतुंममवांछेतिकापिनक

॥२९॥

थयति ॥ हस्तेनचंद्रप्राप्तिर्यथाअशक्यतथामन्मनोरथप्राप्तिरितित्ता
त्पर्यः ॥ द्विजेतिसंबुद्धिः ॥ राज्ञश्चंद्रस्येतिवा ॥ अथचस्वाभिलाषंकथयति ॥
द्विजानांराजासम्राट्नलः तद्विवाहेच्छांकाकथयेदपितुनकापिनल
विवाहेच्छांममेतिकथंकथयेदितिभावः ॥ अथचसलज्जत्वादकुंनशा
क्यतआह ॥ हेद्विजराज ॥ कास्त्रीपाणिग्रहणेविवाहेअभिलाषंइच्छां
निर्लज्जासतीप्रकटयेदपितुएवंप्रौढैनकथयतीत्यवालेत्यर्थः ॥५१॥
वाचमिति ॥ सहंसः मद्वीकयाद्राक्षयातुल्यरसोयस्यास्तांमद्वीकोमलां
तदीयांनैमीसंबंधिनींवाचंपरीपीयसादरमाकर्ण्यपरपुष्टानांकोकि

कर्मप्रवचनीयत्वाल्लंकामिति द्वितीया॥ अभिलाषस्य गम्यादिपाठाद्वात
दिति॥ सा च लंका च नक्तं तन्नपुंसकमनपुंसकेनेति एकशेषः॥ पाक्षि
कं मे स्तु सं च॥ ९९॥ इतीति॥ तेन पत्ररथेन पक्षिणा इति पूर्वोक्त प्रका
रेणेरितोक्ता क्षोणानिजाभिलाषकथनप्रस्तावे नल लज्जितास्वाभिलाष
स्य प्रापकोहमिति तेनोक्तत्वात् हृष्टा ह्लादयुक्ता विस्मितेति यावत् भैमि
ति वचनाणं अवोचत् इति किं॥ मदीयं चेतो लंकां न अयते न प्राप्नोति॥ अ
भिलष्यतीत्यर्थः॥ अन्यत्र अन्यत्रापि कुत्रापि राजनी च नैव साभिलाषं अ
थ च नलं नल नामानं राजानं कमपतीतदति रिक्ते वस्तुनि नैव साभिलो
षमिति श्लिष्टमवोचत्॥ पतत्रस्य रथांडजाः इत्यमरः॥ क्षीणानुद्देविदेतिनि
ष्टानवं॥ अप्राप्य वस्तु प्रापकोहमिति हंसोक्तिं श्रुत्वा हृष्टा सरोमांचा ततश्च
हर्षे लोमहर्ष विशेषयत्वाद्धर्षलोमस्य हुसेव इव द्विकल्प॥ एवं सर्वत्र ज्ञेयं॥
क्लिति चेसनेनलक्षणयोरेव वृद्धि गुणयोः प्रतिषेधार्थोक्तामयतदस्त्र
त्वनिग्लक्षणत्वाद प्रतिहतप्रसारिणी ङि च वृद्धिरिति ज्ञेयं॥ ९७॥ विचिंसेति
॥ चक्रांग संज्ञकानां पतंगानां पक्षिणां राजः राजा हंसो विस्पष्टप्रकटं अस्ता
षमाणां एनां भैमीं जगाद उक्तवान्॥ किं सता बालजनस्य शीलं स्वभाव
एव दुर्लंघ्यत्वादतिगहनत्वाच्च शैलः पर्वतः तं लज्जारूपायां ज॥ यां मञु
नक्रिडन्द्रकामस्तल्लक्षणो नागो हस्ती यत्र एवं विधं विचिंस्य विचार्य का
मपीडितो बालाजनो लज्जया कामं आच्छाद्य स्पष्टं स्वाभिलाषं न कथयती
ति विचार्य विस्पष्टवान दनार्थमेतामाहस्मेत्यर्थः॥ अथ च पर्वतनद्यो

॥ नचेणेति ॥

हस्तीम अतिइस्फूर्तिः ॥ च कोगामान सौकस इस्समरः ॥९८॥ मम
हे मैमि श्लेषकवेः पूर्वं राजकर्तृके पाणिग्रहणे मम वांछेति अनंतरं काम
मनोनलम भिलष्यतीति च श्लिष्टक विलकारिण्या भावसास्त्व क्रमेण का
मनोनलम बाला चेतो नलं कामयते इत्यादेः श्लोकद्वयस्यार्थः ॥ अभिप्रायः सु
धिया विदुषापि केन चिन्ना श्लेषि अद्यापि मंदस्य इतिनमयानाज्ञायीति किं
वाच्यं । अथ च विदुषा विश्लेषादिविवरणे पद्मनाम यानाज्ञापि किं अपि
तु ज्ञात एव तर्हि किमर्थं गोपयसीति भावः ॥ सुधियेति पाठे स्वल्पधियैव नल
न्यबुध्या ॥ ९९ ॥ यदि ममाभिप्रायो ज्ञात एव तर्हि लज्जां साजयित्वा मां पुनः ॥१०॥
पुनः किमिति नाटयसीत्यत्रीं व्याह ॥ नचेतस इति । नु पुनरर्थे ॥ अहं बाल
भावाव्यग्रचेतसः नलमनसः स्थैर्यविपर्ययं चांचल्यं संभाव्य संचित्य ॥१०॥
न स्तम स एव तु वाभिप्रायं अजान एव त्वसाव्यस्मितदेक इति पाठे श्लोकद्व
यार्थस्याज्ञ इति वा ॥ एवकार इवार्थे वा ज्ञातोप्यर्थः किमिति आज्ञात इत्यु
च्यते इत्यात्रीं व्याह ॥ हि यस्मात् बालत्वादेव लोलत्रीले चंचलस्वभावे बा
लाहृदि बालाहृदयलक्षणे लक्ष्ये विषये स्मरेपि दरमिषदपि परा द्रिष्णुः
च्युतसायकः स्यात् नवेदिति संभाव्यते ॥ कामस्यापि मनोभवत्वात्
तेनापि यत् ज्ञातुं न शक्यते तत्रान्यस्य का कथा ॥ बालानां चित्तं चां
चल्यात् नलाभिलाषनिश्चयाभावात् अज्ञ एव जातोस्मीति भावः ॥
अतो निश्चयार्थं पुनर्वदयामीत्यर्थः ॥ अथ च बालानां अल्पकामत्वात्

लानां घुष्टे कूजिते तोषं हर्षं तस्माज ।। यथा विणाक्कणिते विणानिनादे पिच्छ
णां जिगुप्सां वितेने चकार ।। पीककूजितवीणाक्कणिताभ्यामिति मपि तद्धा
कूको मलालरनाचेतिभावः ।। मद्विकागोस्तनीद्राक्षाइत्यमरः ।। मद्विका अतो
गुणवचनादिति ङिवतालं ज्ञायां कणिते नङ्गस्य संज्ञापूर्वकविधिस्यात्क्र
स्वजात्तावः ।। एवं स्य प्रजार्थवाचपीरर्थिशब्दनइति निष्ठायामिनिषेधः ।।
चापि अग्निट केचित्पठंति ।। ९० ।। मंदाक्षमिति ।। अयं हंसः नहं शिते तस्या वचने
अप्रकटं स्वल्पो … यादे किंचन संज्ञायालुः संदीहानः सन्मुखांभोजंप्र
शास्तं मुखं गीरावाचा युयोजवदतिस्मेत्यर्थः ।। कस्यां सत्यां तस्यां भैम्यां मंदाक्षे
ण लज्जया मंदा स्वल्पा अक्षरमुद्रा वर्णविन्यासो यस्यां क्रियायां यथा भवति तत्र पा
उक्तासमाकुंचिता नाकूययात स्थितीं … तायां सत्यां ।। मुखांभोजप्रशंसावचनै
चेति समासः ।। ९१ ।। करेणेति ।। हे भैमी करेण विधुं चंद्रं विधर्तुं ग्रहीतुं वांछेव
स्पृहेव नतु तानि कीस्पृहा इत्यं अनेनैव गोप्याकारेणैव आदरणी आदरफक्तो
।। आदरणी निर्दया अकंपफक्तावालंबं अर्थं प्रयोजनं आघूर्वे अर्हं तमर्थी
कृतिस्यां पातुं सादरं श्रोतुं अपि किं नो धिकुर्वे किं नाधीकारी न वामि ।। कुर्वे
यद्यपि असमर्थस्तथापि श्रोतुं शक्त एवेत्यपि शब्दार्थः ।। अथ च तमर्थं कर्तुं अ
धिकारी न वामी किंपुनः श्रोतुमित्यपि शब्दार्थो वा ।। अंतःकरणेन ज्ञात एव
श्रोतुमपि नाधिकूर्वे अपि तु अधिकूर्वे इति वा ।। कः कमिव ।। अंतिमो वर्णः श्
द्रः अतेवेदस्य वर्णमक्षरमिव ।। वेदाक्षरश्रवणे शूद्रस्याधिकारो नास्ति ।। तथा

ममनेतिभाव:॥आह्वेतिभूतेपिवर्त्तमानसामीप्य इतिवत्प्रत्यय:॥अंतिम:
अताख्येतिवक्तृव्यादिमन्॥८२॥अवाप्यत इति॥हस्तेन चंद्रधारणवत् दु:
प्रापयंपदुर्लभंतन्न किंचिदस्ति॥यो अर्थ:चित्तैकपद्यां अंत:करणेनाक्रम
गम्येतिसूक्ष्ममार्गेपिविद्यतेभगवस्या अवाप्यतेवानिश्चयेऽ चंद्रधारणदृष्टां
तेनयत्तस्यार्थस्यदु:प्रापत्वमिपत्किं भूयत् गौरवंकिमर्थंतन्नकार्यमित्यर्थ:॥
अथचपरचित्तगोचरोविषय:सूक्ष्मेनज्ञायतेइत्यज्ञोपनंतस्यकिमर्थंसमया
ने पेणं शास्त्रेण नलः कामस्य जय्यो नान्यैरिति भावः ॥ धनुर्मौर्वीश्म ध्येगुलिका
रोपस्थानं भवति ॥ तदत्र नास्ति रेव रोमावलिर्मौर्वीरंगयष्टिर्धनुः सराज
हंसो व्येध्यमित्यर्थः ॥ विभ्रूस्त्व गुलिकाधनुःक्रीडां करोति ॥ हारस्तेदायष्टि
त्तेदा गुच्छाधगोद्यस्मरः ॥ राजहंसोन्यपश्रेष्ठे कादंबकलहंसयोः इति वि
श्वः ॥ २७ ॥ पुष्पेषुरिति ॥ तेन नलेन सौंदर्यादिगुणेन जितः पूर्वं वैलिंध
वैरागं प्राप्य यः पुष्पेषुकामस्ते तव चिकुरेषु केशेषु पुष्पेषु तात्वशास्वयं

बाणसमूहं चिक्षेप स त्यक्तवान्॥ तव ताल मूले ललाट भ्रूमूले भ्रुस्थाने स्वधनु
स्त्यक्तवान्॥ रौद्रे रुद्रसंबंधिनि दारुणे चक्षुषि अक्षुभ्याष्टे तृतीयनेत्रलक्षणे
ज्ज्वलनपात्रे खिन्नतनु चिक्षेप क्षिप्तवान्॥ स कामः अधुनावितनुः शरीररहितो
ऽपच विशेषस्त्वत्रः तन्नतज्जयाय तं नलं जेतुं मामेवाश्रमं आश्रयत्॥ तथा
तव उरोजौ स्तनावेव शैलौ तावेव नीलयः स्थानं यस्याः सा तत्र विद्यमाना या
पत्रालि पत्रवल्लीपंक्तिः तस्य कामस्य पर्णशालेवाचरतीति भवति भैमीकेशपा
शापुष्पाणां कामजननकत्वात् कामबाणत्वं॥ भ्रुवोरपि कामजननकत्वात्
धनुष्ट्वं स्तनपर्वतनिलयपत्रालीनामपि तज्जनकत्वाद्गृहत्वं॥ तथैव शा
स्त्रेण कामेन जेतव्यः॥ नान्यत्किं निजत्वपायेति तदाश्रवेण मदनस्त्वं पीडयती ॥३९॥
॥३९॥ सर्थः॥ अन्योपि जीतः शस्त्रादि सकामो देहं सक्तो शत्रूं जेतुं पर्वते पर्णशाला
मधिष्ठाय तपश्चरति॥ अनुप्राबंधं समम्यर्थे साहस्ये वाच्यपीभाव॥ स्वदित
तात्तरं॥२८॥ इतीति॥ तत्र तस्मिन्नृपतत्रिणि हंसे इति पूर्वोक्तमालपति
वदति सति तदनुसंधौ भैम्यन्वेषणे पराः सख्यश्चिरात् बहुकालेन भैमी
परीयुः दूरादिगत्य समागतत्वात् परीवेष्टयामासुः अथानंतरं हंसोपि ते
तुभ्यं शर्म सुखमस्तु॥ मां विसृज प्रेषय इत्युक्त्वा वेगाज्जवनं निष
धाधिपराजधानीं नलनगरीं जगाम॥ नलपीडास्मरणाद्वेगगमनं॥२९॥

चेतइति ॥ सा भैमी प्रेयसो नलस्य दूतो यः पतंगपुंगवो हंसस्तस्य गीर्वाणी से
व हय्यंगवीनं ह्योगोदोहोद्भवं रसात्स्रीतेः स्वादं स्वादं आस्वाद्य सादरमाक
ण्यी कर्णे सिर्धः ॥ तृप्तिं प्राप्ता अंतःकरणे नीतां तमतिशयितं तापमपि संता
पमपि न प्राप ॥ अतुलां निःसिमां मूर्छामपि न आनर्छ न प्राप्य ॥ किंभूतं
हय्यंगवीनं चेतोजन्मनः कामस्य शरास्तु तानि प्रसूनानि पुष्पाणि तेषां म
धुक्तिः रसैः रथ्य च माक्षीकैर्व्यामीश्रं न मलमाश्रयत् ॥ प्राप्नुवत् ॥ तथा
ऽसीमां निर्मर्यादां तथां दृष्टं सुस्वादं सुगंधी च समहेन मधुमिश्रितं घृतं
नीतां तं पीतं सत् संतापं मोहं जनयति अस्यास्तु नैसाश्चर्यं ॥ यद्वा येवंभू
तं हय्यंगवीनं आस्वाद्यापि तृप्तिं न प्राप तापं मूर्छामपि प्राप ॥ हंसमुखान्न
लगुणाकर्णनेनानुरागबाहुल्यात्तापमोहौ तस्या जाताविति भावः ॥ स्वा
दं स्वादमपीति योजना ॥ आसीममीष्ट सुरस्ती सेकपदं वा ॥ तत्तु हय्यंगवी
नं ह्योगोदोहोद्भवं घृतमिति अमरः ॥ पुंगवी सत्र गोतद्धिते तिष्ठ चिटित्सात्
ङीप् ॥ हय्यंगवीनमिति संज्ञायां घुः ॥ स्वादं स्वादं ॥ णमुल् ॥ ॥३०॥
तस्यादिति ॥ बाष्पवारी बाष्पांबु नलसुहृदं हंसं अनुव्रजंती सा तस्याः दृशः भै
मीदृष्टेः न चीराबी भ्रमेन पद्यस्मादवधीर्बभूव ॥ अयेगंतुं न ददौ तेन त
स्मादनेन हंसेन पार्श्वेपि समीपे गच्छतापि भैमीदृष्टेः सकृदादिमत्र्यषे ॥

व्यवहीतिभूतं समीपे वर्त्तमानोपि न लक्षितो गाहं स्वगमनाद्या जातेनाश्रुणा प्रसुंनदत्त इत्यर्थः ॥ तु पुनः आरादपि दूरादपि वर्त्तमानेनीजेनचित्तेन तेर्न व्यवदध्ये व्यवहीतिभूतं ॥ यद्यपि दूरगतस्तथापि प्रियबंधुत्वात्तस्या मनसि अवतिष्ठ इत्यर्थः ॥ बंधुमनुव्रजतो वारि आ वधिर्भवति ॥ उदकांतात्प्रियं पंथानमनुव्रजेदिति वचनात् ॥ इष्टेः पार्श्वे पीतिवा ॥ तदनेनेति पाठः ॥ आराद्दूरसमीपयोरिति विश्वः ॥ विजचस्पष्टेद्दतिकर्मत्व विवक्षायां भावे लिट् ॥ ३१ ॥ अस्तित्वमिति ॥ अथ द्वयोर्मध्ये एकः हंसः निषधनरपतौ एतत्सर्वं वृत्तं निष्पन्नं वचसेति शेषः ॥ आख्यातुं कथयितुं प्रतस्थे किं कुर्वन् पक्षयोः कंपभेदैः कंपविशेषैः त्वया सेमीप्राप्तिरूपाया कार्यसिद्धिरस्तीत्यंसज्ञावं कथयन्निति पूर्वोक्तप्रकारेणोपहृतं उक्तं वचो याभिस्ताः वयस्याः सख्यः अन्यां भैमीनिन्युः अहं प्रापयामासुरित्यर्थः ॥ इतीति किं हे प्रियसखि त्वं कांतारे दुर्गमे वर्त्मनि विषये निर्गतासि प्रस्थितासि ॥ नु अयि मुग्धे त्वां तच्चिते भैमीपदविमार्गः विस्मृता किं त्वया त्वं मारोदीः एहि आगच्छ वयं सर्वा मिलितायाम अहं प्रतिगच्छाद्दति ॥ पक्षकंपनविशेषः कार्यसिद्धिसूचकः ॥ अन्योपि हस्तादिना कार्यसिद्धिं कथयति ॥ कांतारं वर्त्म दुर्गमिमिस्समरः ॥ अस्तीत्यव्ययात्मसत्त्वसयः ॥ आख्यातेति वा पाठः ॥ ३२ ॥ सरसीति ॥ स हंसः यत्र सरसि स्वल्पं पूर्वमपतद्यत् ॥

॥ ३० ॥

॥ ३० ॥

तस्य सरस्तीरं व्रजतेः तस्य अशोकानोकहस्य अशोकवृक्षस्य उपमूलं मूलसमी
पे तं नलं प्राप ॥ किंभूतं स्मरतलं मदनजनीतपीडया चंचलं तथा किसलयानां
अग्रपल्लवानां दलानि कोमलांकुरास्तेषां तल्पं शय्या तस्यामपि ग्लायिनं म्ला
नशीलं किंभूतस्यानोकहस्य ज्वलतो दीप्यमाना असमशरेषवः कामबाणास्तैः
सह स्पर्द्धंते एवंशीलानि पुष्पाणि तेषां श्रेणिः समूहस्तदुक्तो मौलिः अग्रभागो
यस्य वीरहव्यथया हंसं प्रतीक्ष्यमाणः ॥ सोपत्रहंसेन दृष्टः अशोकपुष्पाणां र
क्तत्वात् कामबाणतुल्यत्वं ॥ १३३ ॥ परवतीति ॥ नले उन्मादवशादिति यदति
स्तति ॥ असौ हंसः उपनम्रः समीपगतः सन् तत् नैमीवृत्तांतं सर्वंशशंस कथ
यतीस्म ॥ इतीति किं ॥ चित्ते प्रसक्तिस्तां नैमी प्रस्याह ॥ एनं हंसमपि ॥ परवतीपि
त्राधीनत्वात् परतंत्रे दमयंती अहं त्वां प्रति अद्यापि नागच्छसीत्यादि किंचिदपि
न वदामि ॥ स्वातंत्र्याभावात् ॥ हे हंस त्वं द्रुतं शीघ्रं उपनय मत्समीपमागच्छ ॥
दी सा नैमीमामुपदीश्य किमाहाब्रवीत् ॥ तद्धंस कथयेति वाक्यार्थः कर्म ॥ तद्व
चनानंतरमेवायं गत्वा कथितरानित्याह ॥ प्रियमिति ॥ हि यस्मात् सुकृतानां
धार्मिकाणां प्रीयं स्वाभिष्टं अनुलक्षीकृत्य सस्वस्पृहाय स्वेच्छया एव पि लंबः
न तन्यस्य यदैव तेषां वस्तु प्राप्तुमिच्छा भवति तदेव पुण्यवशात् प्राप्नुवंति
इति भावः ॥ कस्य स्पृहयति कश्चित् ॥ स्पृहायाः विलंबः । इति योजनीयं सुकृता
सुपाकर्मपापमं त्रपुण्येषु स्तम्र इति क्विप् ॥ अहेति वित्तक्ति प्रतिरूपकम
व्ययं ॥ भूतार्थे ॥ १३४ ॥ कथितमिति ॥ स नरेंद्रो नलः हंसेन कथितमपि प्रि

॥३८॥

यायाः भैम्याः भाषितं वचनं किमिति ॥ कीदृक्कीदृक्कूदेवमादराती शायेन तं
सपदच्छन्न पुनरपि हंसं शंसयामास वादयति स्म ॥ अथानंतरं सांशेनिलिड आ
नंदपवमाध्वीकमधुतेन हंहं मत्तो हृष्टः सन् अधीगतं ज्ञानार्थं तद्वैमीभाषि
तं स्वयमपि ज्ञातस्त्वौनेकवारं हंसेन यथोक्तं तथैव दृक्तेभ्योक्तमिति शि
रःपकं पाययसि मानऐनान्वाचचक्षे अनुवादितवान् ॥ अस्मादनस्येयं जातिः ॥
मधविशेषश्चोक्तमपि पुनर्वादयति स्वयमपि पुनर्वदति ॥ मधु माध्वीकमध
योरि ॥ स्मरः ॥ मार्द्वीकमिति पाठे मद्वीकया द्राक्षया विकारो मार्द्वीकं शंसेः
शाब्दकमध्वादर्शोवकुंप्येतत्कर्मसंज्ञा ॥ शातवानान्शातस्त्वः ॥ संख्यायाः
क्रियाभ्यासगणने इति स्त्वासुद् ॥ १३५ ॥ श्रीहर्षमिति ॥ तृतीयसर्गद्वि
परास समाप्तिमगमत् ॥ श्री ॥

॥३८॥

पु. ६३

दोष्णु निपीयेति। एष्यमानो धीतिरश्मी सत्रविच्लेपनिर्णि:। कथेति चिति
पू जितिकर्मण्यप:। बुध्यंत इति बुधा: इत्युपधाके:। सितछत्रितेत्यत्राचा
रकि बताकरोतीति णयंतान्नि छायासेटी निणत्लोपः। ज्वलइत्यत्र
ज्वलति केसंते भ्योण इति णस्वपक्षिकत्वाद्यच्।। अस्यमहाकाव्य
संसर्गबंधो काव्यमिति।। लक्षणवचनात्।। नायकश्चात्र धीरललितः
निश्चिंतो धीरललितः कलासक्तः सुखीमृदुरिति। रसश्चात्र शृंगारः।।
सद्विविधः संभोगशृंगारो विप्रलंभश्च। अपरे सांगभूताः।। एवं सत्र।। रि
अस्मिन्सर्गे इच्छमुमुमिति यावद्वंदारस्थवृत्तं।। ११।। रसैति।। सर्वथा
च्यंसाधारणंत्त्वतीति न्यायात्।। स नलएव भूजानिरभूत्।। महीपति
बभूव नान्य इत्यर्थः।। भूर्जायायस्येति जायाइनिङ्।। स कः यस्य कथाने
वक्तिः शृंगारादिप्तिः पंडुसांसुधांतिरस्करोतीति सेवंत्री लासुधावधिर
णी।। सुधायाः षड्रसत्वं व्याख्यातत्र प्रसीध्याख्यातं। मधुरसंपृक्तं वा।।
यद्वा।। यस्य कथारसैः रक्ता सुधायाः अवधिमुहूर्ष्टां सुधामिति यावत्।।
तामीरयति क्षिपतिइत्सेवंत्री लासुधावधीरणी सपीठः।। तत्रापि सर्वार्थ
यस्य कथारसैः हेलुक्तिः सुधायाः अवधीतस्य रमम्यतं नास्तीत्यर्थः।। दूरलो
पइति दीर्घः। एतेन इंद्रादिपक्षियागेननले जैम्यानुरागेण जैम्यानुरा
गस्य औचित्यं यद्वा।। त्रोत्तनं धावतीति सुधावापुण्यचारिणी त्रिर्यस्ये

तिमंत्रशक्तिमत्वं तस्य द्योत्यते। रणीनिःसंरणो यस्यास्तीति रणी॥ अनेनो
त्साहशक्तिमत्वं भूजानिरिस्मनेन प्रभुशक्तियुक्तत्वं॥ रसाऐरितिपदद्वयं॥
यस्य कथाऐः कामस्य रसाभूः स्थानं सर्वाभिलाषजनीके स्पर्धः। कीदृ
शोनलः सुवर्णेति। सुवर्णस्य दंडः सुवर्णदंडः एकं च तत् सितातपत्रं च
एकसितातपत्रं सुवर्णदंडश्च एकसितातपत्रं च सुवर्णदंडैकसितात
पत्रे सुवर्णदंडैकसितातपत्रे स्तेतद्ददाचरिते सुवर्णदंडैकसितात
पत्रिते प्रतापस्य आवलिः प्रतापावलिः ज्वलंती चासौ प्रतापावलिश्च
ज्वलत्प्रतापावलिः कीर्तेः मंडलं कीर्तिमंडलं ज्वलत्प्रतापावलिश्च कीर्ति
मंडलं च ज्वलत्प्रतापावलिकीर्तिमंडले सुवर्णदंडैकसितातपत्रितेज्व
लत्प्रतापावलिकीर्तिमंडले येन यस्य वा। यथाक्रमं योजना॥ पूर्वश्लो
के सुधासितपत्रे अविशेषेणैवोक्ते अत्र तु विशेषणेति न पौनरुक्त्यं॥ ॥३॥
॥३॥ एवमन्येष्वपि पद्येषु विशिष्टार्थप्रतिपादनान्न पौनरुक्त्यं द्रष्टव्यं॥ अ सं
पवाशोभमानो न्यो द्योवाद्विजादिवर्णानां दंडः शासनं यथाभूतं वं कर
दानं वा यत्र तथैकं शितातपत्रं यस्मिन् तादृशं स्तं तथा ज्वलंसौ प्रता
पावलि कीर्तिर्यस्मिन् यद्वा प्रतापावलियुक्ता कीर्तिर्यस्मिन्नेवं भूतं मं
डलं राष्ट्रं यस्य ये तेन पूर्वश्लोकेन सह न पौनरुक्त्यं। प्रतापस्य दंडस्य
निरूपणात्संकोचः प्रतीयते॥ सावानो चिति। प्रतापस्य व्यापकत्वं वि

नाकीर्त्तेर्व्यापकत्वमनुपपद्यमानं तद्गमयतीति वर्णसाम्यमात्रेण च दंडे
त्वनिरूपणा परिहरणीया ॥ ज्वलदित्यस्य विशेषणं ॥ अन्यथा कीर्त्ती
मंडलशब्दस्य पूर्वनिपातः स्यात् ॥ यद्वा कीर्त्तिप्रतापस्य हेतुत्वादस्य हित
त्वात्पूर्वनिपातः ॥ गुणो रागे द्रव्ये रसदस्यर्थः ॥२॥ कविरिदानीं स्वमोह
संपरिहरंस्तस्यैव गुणानुवर्णने कारणमाह ॥ पवित्रमिति ॥ स्वेति संबंधा
येति योज्यं ॥ या यत्कथा यत्संबंधिनी कथा अत्र युगे ऽस्मिन्कलौ युगे स्मृता
स्मर्यमाणा सती जगद्भुवनं आ सामस्त्येन पवित्रं नुते करोति सा यत्कथा आ
विलां सदोषां मद्गिरमपि रसैः शृंगारादिभिः क्षालनयैवोज्वलीकरणेनैव
कथं न पवित्रयिष्यति अपितु पवित्रीकरिष्यत्येव ॥ जगदपेक्षया मद्वचसो
तरंगत्वात् देवाह ॥ स्वसेविनीमेव स्वकथैकतत्परामेवेत्यर्थः ॥ वैन्यं पृथु
मित्यादिना स्मरणमाह ॥ यस्याः कर्कोटकस्येत्यादिना कीर्त्तनस्यापि महात्म्याद्या
स्टता पवित्रयति सा स्मरणपूर्वकं कीर्त्तिता मद्गिरं कथं न पवित्रयिष्यतीतत्
येन सेव्यते तत्सदोषामपि तेन पवित्रीक्रियते अन्यदपि मलिनं वस्त्रादि
रसेनोदकेन नया क्षालनतया निर्मलीक्रियते अपि यथापाठमेव वा योज्यः ॥
यद्वा पवित्रीकरणे कारणद्वयं आविलत्वं अन्यच्च अन्यरागित्वेन स्वसेवि
त्वं अपि रन्यच्चेत्यर्थः ॥ तत्कथेत्यपि पाठः ॥ साधुः पवित्रमिति वपुः संज्ञाया
मिति कर्त्तरि क्तः ॥ इह तु पवित्रमिव पवित्रमित्युपचारात् क्षालनेति क्षाले
श्चुरादेर्ण्यासश्रंथेति युवयोरनः ॥ क्षालनयैवेति वेन निस समासो विस्त
तस्य लोपश्चेद्वौ ॥३॥

द्वितीयश्लोके तस्य गुणाद्भुतत्वमुक्तं तदेवाह॥ अधीति॥ अयं नलः स्वयं आ
त्मना चतुर्दशसु विद्यासु अधीतिबोधाचरणप्रचारणैरधीतिरध्ययनं बो
धोऽर्थज्ञानं आचरणं कर्मानुष्ठानं प्रचारणं अध्यापनं एतैश्चतुर्भिः उपा
धिभिः प्रकारैश्चतस्रो दशा अवस्थाः प्रणयन् कुर्वन् चतुर्दशत्वं कुतः
केन हेतुना स्तत्वान्न जाने अत्र हेतुर्नास्तीत्यर्थः॥ चतुर्दशसु विद्यासु सुख
तच्चतुर्दशत्वे सिद्धेऽपि तत्करणं पिष्टपेषणतुल्यत्वादयोग्यं चतुर्दशत्वं धर्मः
सिद्ध एव किंच अधीत्यादिचतुर्भिः प्रकारैः एकैकस्या विद्यायाश्चतुरव
स्थात्वेन षट्पञ्चाशत्तावत्वमिति चतुर्दशत्वाक्षेपोऽपि तस्माच्चतुर्दशत्वमे
व स्वयं ज्ञातः सन् स्वतः स्वतन्त्रानि सहं न वेद्मि इति कवेरुक्तिः इत्याशंक्य
पुनः स्वयं वदति चतुर्भिरधीकादशत्वोऽस्य यमर्थोनि चतुर्दशत्वस्य॥ किंतु
चतस्रो दशा अवस्था अधीत्यादयो यासां ताः चतुर्दशास्तासां भावस्तत्वं
तदहं न जाने इति न अपितु जानन्नेवेति काकुः॥ एतेन षट्पञ्चाशत्त्वं निर
स्तं चतुर्भिरधीकादशत्वेति अपि निरस्तं॥ यद्यपि क्षत्रियस्याध्यापनेना
धिकारस्तथापि धनदत्वा ब्राह्मणद्वाराध्यापनं युक्तमिति न दोषः॥
पतेन चतुर्दशा अपि विद्यास्तस्य स्फुरंतीत्यर्थः॥ पुराणं न्यायमीमांसा
धर्मशास्त्राङ्गमिश्रिताः॥ वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश तु
ति याज्ञवल्क्यः॥ बोधशब्दास्ये तरेण समासस्तथा अधीतिशब्देन स

मासः॥ अन्यथानोधस्य पूर्वनिपातस्यात्॥ पद्म अधीते रस्य हितत्वात् पू
र्वनिपातः॥ लङिति अनुवर्त्तमाने पुनर्लङ्ग्रहणं॥ अत्र प्रथमा॥ समा
नाधिकरणेपि शातात घोगा चन लोके तिषष्ठीनिषेधाद्दशाङ्गतिद्वि
तीया॥ एवं सर्वत्र ज्ञेयं॥ चतुर्दशाक्षमिस एलनलो गुणवचनस्येति पुं
वत्व॥ गुणग्रहणेन जाति संज्ञयोर्निवृत्तिः॥ क्रियते न शुक्लादिगुणविशे
षप्रतिपत्तिः तथा च व्रजति हि सफलत्वमिसादयः प्रयोगा युज्यते॥४५॥
उपवेशनामंतर्भावमाश्रित्य विद्यांतरसंबंधं वर्णयन्नाह॥ अनुष्ठेति॥
अनुष्ठानलस्य विद्या मुख्यत्वादेदलक्षणे वनवद्दयदीपपथकूजया
जिगीषये वनु सेप्रेक्षा॥ अष्टादशतां अष्टादशी समकारत्वमगाहत॥
प्रापा यद्यपि विद्यापाः अष्टादशत्वं स्वतयेन विद्यतेत थापि असौ अ
ष्टादशविद्यापि विद्यापते नास्य स्ते सप्तिसंधिः॥ नवानां द्वयं अष्टादशा।
नवद्वयं च ते द्विपार्श्व तेषां पृथकु भिन्ना याः जयश्रियः जयसूचकाः
अथवा जयंतीति जयाः सर्वोत्कर्षेण वर्तमानाः याः श्रीयः तासां जेतु
मिच्छया एक विद्यया एक द्विप श्रीर्जेतव्येति अष्टादशापि विद्यापि
दैः अष्टादशद्वीपे भिन्न जयश्रीयां जीगिषया अष्टादशबुद्धिर्विशेषा
जाता इत्यर्थः॥ अनया बुध्या अयं द्वीपो जेतव्य इति अत एवानुष्ठेव
रसा॥ नाग्रे जीका ग्रेन नर्त्तकी वन नर्तकी स्फुरद्रुपा नान्यस्ये पसर्पः॥ अ

ष्टादशविद्याः अस्यैव स्फुरंती स्म सर्गः ॥ नर्तकस्यापि एकशिरोहस्तादिभिः
षड्भिरंगैः ग्रीवाबाहुकादिभिः प्रसंगे शून्ये आदिभिः षड्भिरष्टादशधा भ
वति ॥ तथा विद्यापि चतुर्दशपूर्वोक्ताः ॥ आयुर्वेदो धनुर्वेदो गांधर्वश्चा
र्थशास्त्रकमिति ॥ चतस्रः । एवमष्टादशद्वीपानामष्टादशत्वमवांतरा
लंकारादिभेदेन भगवतोक्तरीत्या अष्टादशद्वीपनिखातयूपइति का
लिदासोक्तेश्चेति ज्ञातव्यं ॥ पद्मानवद्वयद्वीपानां भिन्नाया जयश्रियः नलि
तानलस्यश्रियस्तासां जेतुमिच्छेवेति लुप्तोत्प्रेक्षा ॥ नलेनाष्टादशद्वी
पाः जीतास्तेन तस्य तावत्सूः श्रीयो जातास्तासां जेतुमिच्छया विद्याप्प
ष्टादशत्वं प्राप्ता ॥ श्रिसरस्वत्योः सहजविरोधात्सपत्न्योरिव ॥ केव ॥
अंगगुणेन षट्संख्यागुणेन विस्तारं नीता विस्तारं प्रापिता त्रयी वसं
ख्याष्टादशत्वं प्राप्नोति ज्योतिःशास्त्रे त्रित्वं षट्संख्यया त्रित्वं प्रापितम ॥५॥
ष्टादशतां लभते ॥ तत्रांगशब्देन षट्संख्या गृह्यते ॥ तथा गुणनाव्यक्तिः
॥५॥ यद्वा त्रय्युद्धारः ॥ अथर्ववेदः सप्तकः षडंगानि व्याकरणादीनि गुणाः
प्रधानानि ॥ पुराणं न्याय मीमांसा धर्मशास्त्र आयुर्वेद धनुर्वेद गांध
र्वकौ व्यर्थवेदार्थशास्त्र लक्षणानि अष्टौ ते विस्तारं नीता वेदत्रयी
पथा अंगानि च गुणाश्च एतेषां समाहारो गणंते न ॥ अथ च स्वादु
रोमोदनप्रकारकथनद्वारा श्रुतासती लोकस्य रसनाग्रजिकायंन

र्त्तयतीति रसनाय नर्त्तकी सूपकारविद्याऽंगानां अवयवभूतानां म
धुराम्लवणतिक्तकटुकषायाख्यानां न्यूनाधिकसमत्वरूपेण गुणे
नाष्टादशतां प्राप ॥ यथा मधुरद्रव्ये मधुरद्रव्यांतरस्य न्यूनप्रक्षेपः । ति
क्तेऽधिकः आम्ले समस्त्वेनेन प्रकारेण सर्वेर् रसानां त्र्यधिविद्यात्र षो
डशत्वं पद्यांगानां दुग्धदध्यादीनां तथा च सूपशास्त्रं ॥ दुग्धं दधी
नवनीतं घोलपनेत क्रमस्तत्कथ्यते ॥ मध्याटवीकं हविष्यं द्विदलान्नं
चेति विज्ञेयं ॥ कंदं मूलं शाखा पुष्पं पत्रकं फलं चेति ॥ अष्टादशाकं मां
सं पत्रक्षाण्युक्तानि गिरिस्तुतयेति ॥ दध्युदकमस्तीस्फुच्यते ॥ कणि
शात्तवं श्रीह्यादि रींजीत्तवंभु शादि घंटकत्तवं चणकादि इति त्रिवि
धं धान्यं । भूचर जलचर खेचर त्तेदात् त्रिविधं मांसं षड्रसाः कं
दमूलनालं पत्रपुष्पफलमयं षड्विधं शाकमिसैव धान्यादिषं अंगे
न विस्तरं नीतेति केचित् ॥ घृतावैशेन बहुभाषिणोनलस्यादि
काग्रनर्त्तकी विद्याक्षविद्यांगकानां द्विकादीनां गुणेनतद्वशेन वि
स्तरं नीता सप्तष्टादशतां प्राप चतुरंगद्यूते हि द्विकत्रिकं चतुष्कपं
चकैर्मिलीतैश्चतुर्दशात्तवंति तथा चोपकष्टमेलनादष्टादशात्ते
दा इति केचित् ॥ तपः शास्त्रविदष्टादशाद्दीपजयाश्च यमिसर्थः ॥
नर्त्तकीस्त्रशिल्पिषु तिषहाऽीपू ॥ जियादिसगीषयेसत्राप ॥

प्रसृपादिस्पृ॥ इतिनिषेधाद्रूपोरपृ॥

प्रसृपादिस्पृ॥ प्रसर्पः। विस्तरं इस्तत्राशब्द इति निषेधाद्रूपोरपृ॥ ॥५॥ प्रका
त्रयीतास्य त्रिष्व संख्येति पक्षे विस्तर इव विस्तम्भिरूपचारः॥ प्रका
रांतरेणतस्यत्रोत्रगामीत्वं वदति॥ दिगीशानिति॥ सनलः शास्त्राण्य
वद्वयाधिकां दर्शांबभार शोस्यलक्षणं द्वयाधिकं चक्षूरविषयभूतस्या
प्यर्थस्य ग्रहणादप्यत्रापिन्नत्वात् तृतीयां दर्शां बत्तार॥ तृतीयनेत्रे सति
त्रिवं त्वयतीति शास्त्रारव्यं तृतीयनेत्रं दधावित्यर्थः॥ किंभूतां दर्शां काम
स्यस्वेच्छाचारस्य यः प्रसारः प्रारब्धं तस्य अवरोधिनीं निवारिकां शा
स्त्रदृष्टः पापकर्मण्यप्रवृत्तेः अतएव निजस्य आत्मनः त्रिनेत्रावतरत्व
स्य त्रिनेत्रस्येवावतर इत्यर्थस्य बोधिकां ज्ञापिकां त्रिनेत्रोऽपि कामप्रस
रं रुणद्धि स्म॥ तथायमपि शास्त्राभ्यासाल्लोकानां स्वस्य च स्वेच्छाचा
रित्वं निवारयति स्म। अवतरो नामो प्रति॥ यद्वा निजः स्वसंबंधिनि सः
सहजो वा त्रिनेत्रावतरो यस्येति बहुव्रीहिः॥ तस्य भावस्तत्वं तस्य ज्ञापि
कां किंभूतो नलः दिगीशावंशांशविभूतिः दिगीशा इंद्रादयस्तेषां वं
शानि तेषु अंसेन लेशेन विभूतिर्यस्य नलस्य विभूते लेशो दिगीशावं
देषु वर्तत इत्यर्थः॥ एतत्कुतः यतो यं दिशां इत्रिं तासर्वासां दिशां त्रा
सिता तेन ककैकस्याः दिशः तस्मात्क्षात्रं दि॰ ॰दं किमपि नवनीतीस
र्थः॥ त्रिनेत्रोऽपि दिगीशावंदमध्ये ॰ंशेन ॰ोन विभूतिर्यस्य य

॥६॥

॥६॥

घदिज्ञतिमहत्त्वमितिवचनात्॥ विक्षोरि रस्य चाभिन्नत्वास
र्वस्यांदिशां शासिता त्रैलोक्यस्वामीत्वात्॥५॥ वादिगीशावंदं शेनवि
भूतिरेक दिग्विभागैश्वर्यं यस्य स वा दिगीशावंदमध्ये ऽंशोयत्वादि
भागो यस्य विशिष्टा भूतिरणिमाद्यैश्वर्यं च यस्य ततः कर्मधारयः॥
यद्वा दिगीशाः इंद्रादयो ऽष्टौ तेषां वंदं तस्यां शोभमानाभिर्जन्म यस्य अ
ष्टाभिश्च सुरेंद्राणां मात्राभिर्निर्मितो मनुः इति॥ मनुः॥ यद्वा दिगीशा
वंशः शासको विशिष्टैश्वर्यश्चात एव दिशामीशितेति॥ पृथुकतिपये
ष्वर्थेषु नलस्य लोकपालांशत्वप्रतीतेः॥ त्रिनेत्रावतरत्वस्य गौणत्व
प्रतीते रस्मा मंजस्यं स्वत्वं तु त्रिनेत्रावतरत्वं अत्र संपाद्यं स भूपभू
दस्मानामपि लोकपालानामित्राइतिवक्ष्यति॥ त्रिनेत्रशब्देनात्र इशो
नव्यतिरिक्तः॥ सर्वेश्वर उच्यते इति॥ तात्पर्यशास्त्राणि ह्यामपि पद
द्वये लिंगवचनभेदे ऽपि वेदाः प्रमाणमिति वचनात्॥ विभक्तिरेकै
व॥ यदुक्तं॥ लिंगसंख्याविभेदे ऽपि ह्युपमानोपमेयता॥ विभक्तिः पुन
रेकैव चोपमानोपमेययोः॥ नलपक्षे दिगीशस्यादेव्याधिकरणे
पि बहुव्रीहिः॥ सप्तमीविशेषणबहुव्रीहाविति ज्ञापकबलादंगी
कर्त्तव्यः॥ इन्द्रितेति तच्च॥ प्रसर इति प्रथमवचनाद्यः॥ प्रसर

नलजांतइतिप्रयोगवचनात्॥ अवरोधिनीतिसुप्रकरणादुपसर्गनि
वृत्तस्ताच्छिल्ये णिनिः रमोगाद्यवश्यकणिनि भाष्यकारमतेतिसु
पूमात्र ताच्छिल्येपि संगतिः एवमेवजातीयेन्यत्रापिज्ञेयात्रिनेत्रो
पि क्षुभ्वोदित्वाभावः॥ अवतरत्यामवतरइतिभावेतिरुदोरिव सपू॥
रस्युटोबलमिति सूत्रादितपरिभावे अवेत्स्त्रोर्घञिति अवतरइति
भावेस्यात्॥ तस्यां संज्ञायां कारणाधिकरणयोश्चाविधानात्॥ प्रलते
तदभावादावेव॥ यद्वा अवतरतीत्यवतरः त्रिनेत्रश्चासावतरश्चेति
पचाद्यविज्ञेयं॥ अवतरत्वस्यबोधिकेतिशेषषष्ठ्याः समासः न लुकर्म
षष्ठ्याः तृचकाभ्यां कर्तरीति निषेधात्॥ न चैवं सति निषेधे व्यर्थः
कारकषष्ठ्यां समासेहि स्वुद्ये वृक्षसमासे समासांतोदात्तत्वमिति
स्वरविशेषस्य सत्त्वात्॥ एतेन जनिकर्तुः प्रकृतिस्त॥ प्रयोजकोहेतु
श्चेति निर्देशो व्याख्यातः॥ अनित्यषष्ठीसमासमासनिषेधे इत्यन्ये॥

॥८॥

यद्वा बोधयतीति बोधेति ख्यापयतीति प्रवेणिषष्ठीसमासात्॥ स्वार्थि
केकनिपूर्वस्यात इति॥ अवतत्वं बोधयतीति कर्मण्यणि इति णि
ङीपि कनि के नखत्वमेवेति समर्थनीयं॥६॥ पदेरिति॥ अमुना
नलेन चतुर्भिः पदैः चतुर्भिश्चरणैः सत्यस्तोषशमदमरूपैः त
पोदानयज्ञज्ञानरूपैर्वा स्खलते स्थिरीस्तेनिश्चलीस्तेसतीस

॥८॥

ते कृतयुगे केऽधर्मजनाः तपोधर्मं न प्रपेदिरे ॥ न प्रापुरपि ते सर्वे धर्म
पराः बभूवुः ॥ कृतयुगे धर्मस्य चतुष्पादत्वे सिद्धेऽपि अधर्मस्याप्येक
स्य पादस्य सद्भावत्वं कामानेनाधर्मस्यातितरां स्वीकरणादिष्टरितक
रण्याद्यप्रसक्त्योपपत्तिः ॥ कुतावगंतमेतदित्यत आह ॥ यद्यस्माद्धर्मविरुद्धो
अधर्मोऽपि तपस्यितां धर्मरतां दधार अन्ये तपश्चक्रुरिति किमाश्चर्यं ॥
किं कुर्वन् एकांघ्रिकनिष्ठया भुवं स्पृशन् एकांघ्रिर्यस्यासौ एकांघ्रि
कः सा चासौ निष्ठा स्थितिश्च तया एकचरणेकनिष्ठया भुवं स्पृशन् ॥
अत एव वत्स[illegible]दुर्बलः क्षीणः धर्माधर्मौ चतुष्पादौ धर्मस्य ज्ञानादय
श्चत्वारः पादाः अधर्मस्य तद्विपरीताः तत्र कृतयुगे धर्मः चतुष्पाद ध
र्मस्य एकपात् ततश्च धर्मात्तन्न्यूनत्वमेवाधर्मस्य कृत्स्नात्वं अथ च दीन
त्वं ॥ अन्योऽपि महातपस्वी पूर्वावस्थो[illegible] भवति । नलः कृतयुगे नाभूदि
ति कश्चित् तत्र सर्वपुराणेषु कृतयुगे एव नलसंभवस्योक्तत्वात् ॥ अ
वश्यंभाविभावानां प्रतिकारो भवेद्यदि ॥ प्रतिकुर्युर्न ते नूनं नलराम
युधिष्ठीराः ॥ इति युगक्रमनिर्देशात् विरुद्धमिति ज्ञातव्यं ॥ तन्मतेऽपि
त्रेतायामनाहृतिः स्तुतिस्तस्याः स्तुते धर्मस्य चतुर्भिः चरणैः न
लेन त्रेतायामपि कृते कृतयुगे स्थिरीकृते सती धर्मस्य बाहुल्यात् त्रेता
युगमेवेति सविसर्गपाठमंगीकृत्य व्याख्येयं ॥ यद्वा ॥ अनेन त्रेतायां च

चतुर्भिः पदैः धर्मे स्थिरीभूते सति तेनैव सत्ययुगे जाते सति केन त
पः प्रपेदिरे॥ यत्र चतुष्पाद्धर्मस्तदेव सत्ययुगं च तपस्वी चानुकंपार्ह
इति विश्वः॥ तपस्वीति तपः सहस्राभ्यामिति तिः॥ ॥७॥ ॥ यदस्येति॥
अस्य नलस्य यात्रासु दिग्विजयेषु यद्बलेन सैन्येनोद्धतं रजः तदेव त
द्रज एव विधोश्चंद्रे कृतां कलंकतां अद्यापि दधाति॥ किंभूतं रजः स्फु
रत्प्रकाशमानो यः प्रतापः स एवासह्यत्वादनलोग्निस्तस्य यो धूमस्तस्य
मंजीमेव सौंदर्यमिव मंजिमा यस्य तत् धाडुतां गत्वा सुधांबुधौ सुधा
समुद्रे पतितं सत् अतएव पंकीभवत् कर्दमीभवत् सुधांबुधेरुत्प
न्नं सत् तत्संबंधात् कथं चंद्रेपि लग्नः स एव कलंक इत्यर्थः॥ आसमुद्र
यात्रा सेनाबाहुल्यं चान्येन द्योत्यते॥ सुधांबुधिः क्षीरसमुद्रः सुधां ॥८॥
॥८॥ बुधौ अमृतसमुद्रे विधुविशेषणं वा॥ रजसः पंकीभवनयोग्यत्वा
र्थमुक्तं॥ अथ च यत्पतितं पातित्यहेतुः तदन्यस्पृगपि निर्मलस्यापि स्वसं
गान्मालिन्यं करोतीति देवदधातीति काकुः लुप्तोत्प्रेक्षा वा॥ मंदरक्षुब्धादि
भ्य इति दृढादेराकृतिगणत्वान्मंजिमेत्यत्र इमनिच्। द्वितीया श्रीता
तपतितेति पतितशब्दः साधुः॥ ८॥ स्फुरदिति॥ परः शताः शतात्परे
नंताः परे शत्रवः संग्रामे निजस्य स्वकीयस्य तेजः त्रिशिखिनः
प्रतापाग्नेरिंगालमिव दग्धकाष्ठमिवापरो वितेनुः विस्तारया

मास्त्रुः॥ इंगालो भाषा शब्दः कविभिर्यथोधवलमयत्राः शामं वर्ण्यते॥ के

धं भूतस्य तेजः शिखीनः स्फुरदितिप्रकाशमानो धनुर्निस्वनः कोदंडशा

ब्दोयस्य एवंविधश्चासौ सश्च नलः स्फुरद्धनुर्निस्वनः तस्य नलस्य घना

निबीडाः ये आशुगाः बाणाः तेषां प्रगल्भा प्रौढा असह्या पाव्यष्टिस्तया

व्यथितस्य निर्वापितस्य स्फुरन्दधनुर्निस्वनोयस्यामितिव्यष्टिविशेष

णं वा॥ तस्य नलस्य अन्यत्पूर्ववत्॥ यद्वा धनुर्निस्वनो तनोतिवि

स्तारयति रयते प्राप्नोति धनुर्वनिस्वनं तनत्स्फुरन्प्रकाशमानश्चा

सो धनुर्निस्वनतश्च प्रस्वादयमेव तस्य अन्यत्पूर्ववत्॥ यद्वा

स्फुरंतौ धनुर्निस्वनो धनुः सिंहनादो यस्य॰ स चासौ सश्चेत एव

घनो मेघस्तस्या शुगाशी अग्रगामिनी प्रौढा च शिरिन पक्षे लु य

द्वा स्फुरंती इंद्रधनुर्गर्जति येषु ते त एव घनाः मेघास्तेषां आशुं

गाशी अग्रगामिनी प्रौढा आशुगेन वायुनावा प्रौढा या॥ व्यष्टिस्त

या व्यद्वृतस्येति निस्वनं तन्वतीति निस्वनतः स्फुरद्धनुर्युक्ता निस्व

नं तत श्च पि घना मेघा इति वा तेजः प्रधानस्योऽग्ने रिंगालः श्याम

एव ति सर्वे राजानस्तेन जीता इति भावः॥ आशुगो वायुविशिखा

विसमरः॥ निस्वनं तनोतीति निस्वनतदस्यत्र पक्षे तत्तागमः॥

॥८॥

कचित्स्त्र गमादिनामितिवक्तव्यं॥इतिवचनादनुनासिकलोपेपेतकृ
त्संज्ञापूर्वकत्वाच्च नहिवृत्तीतिदीर्घाभावः॥तपतेर्वाक्विपिर्च्यविलिनीपलो
पेनुस्वरानाम्रइतिविग्रहः॥पंचमीतियोगविभागाद्धतुलकाद्यासमासे
राजतेतिपरेनिपातेपरेस्करादित्वात्सुट्॥छेचपरः॥राताइतिसिद्धं
॥८॥अनल्पेति॥सराजघोरात्तोहंतीतिराजघः नचक्षुद्राकरात्तां हंतानं
लः नीराजनयाआरार्त्तिकेनरराजभुभुजे॥किंभूतोनलः जयायविज
यायभुवोवलयंमंडलंप्रदक्षिणीस्यस्पृष्टः॥किंभूतयानीराजनया
स्पृष्टयास्तयापौरलोकैरितिशेषः॥किंभूतं भुवःवलयं निजप्रतापैः स्व
कीयैस्तेजोभिः ज्वलत्प्रकाशमानं किंभूतैः निजप्रतापैः अनल्पा
निबहूनिदग्धानिअरिपुराणिवैरीनगराणियैस्तैः अनल्पदग्धारिपु
रास्तैःचतेअनलावकयस्तैरुज्वलादीप्यमानास्तैर्भूरितरैरित्यर्थः॥
तेजस्तेजोंतरसंयोगेभूयस्त्वंभवति॥अनलैरुज्ज्वलैरितिनायकाः किं
भूतयानीराजनयाउक्तविशेषणैः निजप्रतापैरेवस्पृष्टयानलेनैवृ
स्तयाकिंभूतंभुवःवलयं॥ज्वलत्नलेनैवदीप्यमानंशोभमानमि
त्यर्थः अतएवराज्ञाममाभावोनीराजंनीराजकरणंनिसृजनेसत्राव्य
यं॥विभक्तिसमावेव्ययीभावः॥अन्यथोतिडजंताकरोतीतीण्यं
तायच॥प्रचुरज्वालितंवैरीनगरवह्निनैवदीप्तैःस्वीयप्रतापतेजो

॥८॥

क्षि: दिग्भूमंडलं जयाय जेतुं परिक्रम्य स्वैरेव प्रतापैः सृष्टया नीराज
नया राजाभावकरणेन स्वरेजे इति भावः ५ जयाय भूमंडलं जेतुं परि
क्रम्य पश्चात् ग्रामभावकरणं तेन रेजे इति वा यद्वा ज्वलत्प्रकाशमानं भू
मंडलं जयाय जेतुं प्रदक्षिणी स्वस्य स्वकीयपश्चात्र तेजोभिः सृष्टया आरा
र्त्रिकविधानेन रेजे ॥ प्रतापै नीराजनयेति व्यस्तरूपकं वा ॥ तत्र ज्वल
३ द्भूमंडलं जेतुं प्रदक्षिणी स्वस्य सृष्टया अर्थान्नलेनैव तिरस्कृ[illegible]यं ॥ व्या
पश्चात् स्वीयतेजोभिः पुरलोकैर्विजयस्य अग्रे आगमहस्तजयेस्सति ॥
अयेन श्रुत्वा यत्क विधिनाहेतुना सृष्टयेति वा ॥ गमनागमनयोर्नीरा
जनं क्रियत इति वा ॥ गमनागमनयोर्नीराजनं क्रियत इति लोकाचा
रात् ॥ नलस्य जयप्राप्तं हस्तयेति वा ॥ ये जये यत्नपागमने सृष्टया अ
चेवे स्मिन्पक्षे पुरात्लोकैः हस्तैः सन्वयः ॥ जयाय गमने विजयाय सृष्टया
नीरस्य शांसृदकस्य अजेनाक्षेपगात याचा ॥ यद्वा नलस्योज्ज्वलैः
शृंगारभूतैर्निजप्रतापैरनल्पदग्धानि अरिपुराणि यास्तुताः अन
ल्पदग्धारिपुराः अत एव ज्वलंती देदीप्यमाना भुवः वैरी देशान्नू
नलपनस्वाधिनी कुर्वन्नृपद्वा किंभूतं नलयं अनलपदग्धारिप
वीयस्मिंस्तदनल्पदग्धारि अस्मिन्नपि पक्षे पुरासृतयेसन्वयः ५

यद्वा किंभूतो नलः अनल्पदग्धा आसमंताद्रिपुरा येन रिपुद्रव्याणि येन सः
शृंगारः शुचिरुज्ज्वलो रसः इत्यमरः ॥ ज्वलयन्नुज्ज्वलदिस त्रपक्षेपरसवर्णः प
क्षांतरे तु श्लेषः ॥ राजघ इत्सूपसंख्यानमिति निपातः जयायेति ॥ तिलुम
र्थादिति चतुर्थी ॥ यद्वा सराज्ञां हंता नलः अजयालक्ष्म्या आयविपूर्वेस्य
ष्टयानीराजनया रेजे । राज्ञा विष्णुरूपत्वात् ॥ लक्ष्म्या नीराजना क्रीयते
ती कुशलः ॥ यतः कारणात् प्रदक्षिणी प्रसृष्टाद्दक्षिणादात्रहं वेषां ते
प्रदक्षिणा व दान्यास्ते संति यस्या सो प्रदक्षिणी अतिवदान्यापेतयानु
रचरायी स्वयं वदान्यमतद्रसर्थः । यद्वा प्रतिसृष्टाद्दक्षिणाज्योतिष्टोमाद
यो यस्य संतीति प्रदक्षिणी अत एव वस्तुतीकर्मकुशलः ॥१०॥ निवारी
ता इति ॥ अतीवक्षयः इतयः प्रतीपभूपालेष्वगीदृशां प्रतीपा वैरीणा
॥२०॥ भूपालाः राजानस्तेषां मृगीदृशो नायिकास्तासां दृशोर्नेत्राणि भूनं प्रा ॥१०॥
येण नतसज्जुर्नमुचुः भूनमुक्षोक्षायां वा । इतयस्तस्य राज्ञे न संतीसर्थः ।
किंभूता अतिवृष्ट्यः । तेन भक्षेण अखिले महीतले नीवारिताः प्रतिषि
द्धा निष्काषिता इत्यर्थः । किंभूते महीतले नीतिरिति भावं निर्गता इतयो य
स्मात् नीतिरितितस्य भावे तस्मिन् ते प्रथिते यतः । अनन्यविश्रमाः न
विद्यते अन्यो अन्यत्र या विश्रमो वा सस्य । नवा सांतोः अनेन सर्वे
पि शत्रवो निहता इत्युक्तं । यद्रूपेण निष्काष्य नेतव्य तद्दर्शनमाश्रयति ॥

स्त्रीणां स्त्रीय एव त्रारणमिस्फ[illegible] ॥ व्यतिरेक[illegible]त्राद्दृष्टि[illegible]रवका : राल
भा : शुका : ॥ असास्त्रन्वाच्यं राजा[illegible] [illegible] नद्धतिनोदात्तेयं रदे त्रासे
तिवद्धि निषेध : ॥ ११ ॥ सिते ति [illegible]अर्थ्यचातुरीतुरीत [illegible] णे : रणांगणेय
रा : पटं वयतिस्म ॥ तस्य नलस्य भटा : [illegible]सयासौ जट[illegible]च्च ते षां तस्य वाचालु
रीपुद्र नैपुण्यं सैव तुरी निष्पन्न[illegible]वेतु नदंड : तस्य न[illegible]स्य गुणे स्तैः प्र
सिद्धैर्याशौर्यादि गुणै : अथ च गुणै : तंतु भि : संग्रामांगणेय शो लक्षण
पटं विस्तारयति निर्मातिनिर्मासीदित्यर्थ : । किं भूतैस्तद्गुणै : सितां शुच्चं
द्रः तद्वर्ण : सारूप्यं येषां धवलैरित्यर्थ : । की दृशी महान् पो असि : खड्ग :
स एव वेमा वयनकाष्ठं तस्य सहस्र तुरी सहकारिणी किं भूतं परा : पटं
बहु महापरिमाणं अत एव दिशा एवांगना स्तासामंगनानामावरणं आ
च्छादकं सर्वदिक्व्यापीनमित्यर्थ : । परस्परि [illegible]वितेज [illegible] तामाशु क
र्तुं भवतितिहि ॥ विपक्षे च्छेदमग्रे सरोपीतिन्यायेन पटैरेव नलस्य शौ
र्यं विवेष्ट्र वैरीणो हता दिग्व्यापी नलस्य यशो आकाशितिभाव : ॥ तं तु
वायतुर्यासकाशा दियं तुरी अन्या स्त्री सा प्रसेक मावरकं अनेकं
पटं वयती ॥ इयं तु तद्विपरीते तु ॥ व्यतिरेक : वेमापुंसि वयतिस्मेति लट् ॥
स्मद्दृति भूते लङ् ॥ सहस्रतुरी राजनी पुंधि कुत्र वर्त्तमाने स्तहैवेति का

निपिचनारेचेति ङिः॥ स्त्री चातुर्यमेव चातुरी ष्यञ्षीत्वात् ङीष्॥ ॥१२॥
प्रतिपेति॥ विरुद्धधर्मैरपि मिथो विरोधिस्वभावैरपि धर्मैर्विरुद्धभावः त
तोन्नलोद्वियायेनत्तेत्ताविरुद्धत्वं उज्झिताद्विं॥ केरिवप्रतीपाह्वपेतीव॥
प्रतिकूलराजश्रियथा तेत्तासक्ता उपजापकारीत्वमुपजातिर्निंदः कु
त एतत् ज्ञातमत आह॥ यद्यस्मात्सनलः ओजसा अमित्रजीत् अमि
त्रान् वैरीणो जयतीति अमित्रजित्॥ तथा ओजसा तेजसा मित्रजित्॥
सूर्यमपि जयतीति अवर्तत॥ आसीत्॥ स चारदृगपि विचारदृगवर्त्त
त॥ चारा एव दृक् यस्य स चारदृक् कथमिति विरुद्धधर्माः तेर्नैत्त्ताउ
ज्झिता॥ कथं तेजसा अमित्रजित् अत्र जित् तेजसा मित्रं सूर्यं जयती
ति मित्रजित्॥ तथा विचारः शास्त्रमेव विवेको या दृक् यस्य स विचार
दृक्। चारा एव दृक् यस्य स चारदृक्। अपि स्वार्थे विरुद्धत्वपक्षे उत्त ॥११॥
पत्रापि योज्या। अथवा विरुद्धत्वं अमित्रजित् यः स मित्रजित् कथं।
असुहृदयं यो जयति स सुहृदं कथं जयति अपचयो वा सूर्यं जयति
स सूर्यं कथं जयति इति विरोधस्य परिहारः। पूर्वव्याख्यानं विचारं पश्य
ति दृग्विचारैः पश्यति मा जानेदिति। एतेन ओजस्वित्वं तेजस्वितत्वं शा
स्त्रमार्गगामित्वं चारेक्षणत्वं च व्यक्तीकृतं। एतेन विजीगीषुत्वं नल
स्य द्योतितं॥ अरिमित्रमरेर्मित्रं मित्रमित्रमतः परं॥ तथारिमित्रं मित्रं

॥११॥

च विजिगीषोः पुरःसराः ॥ पार्ष्णिग्राहस्ततः पश्चादाक्रंदस्तदनंतरं ॥
आसारावनयोश्चैव विजिगीषोश्च पृष्ठतः ॥ अरेश्च विजिगीषोश्च
मध्यमो भूम्यनंतरं ॥ अनुग्रहे संहतानां व्यस्तानां च मध्ये प्रभुः ॥ उ॥
मंडलाद्बहिरेतेषामुदासीनो बलाधिकः ॥ एवं द्वादशराजमंडली ज्ञात
व्या ॥ ततः सेत्रैस्यपादानत्वं ॥१३॥ तदोजस इति । विधिः ब्रह्मावस्य
दा इति पूर्वोक्तं किंचित्तेमनसि कुरुते विचारयतीत्यर्थः ॥ तदा नदा भानोः सू
र्यस्य विधोः शशिनश्चंद्रस्य च परिवेषकैतवात् परिधिव्याजात् कुंडलं
वैयर्थ्यसूचकरेखावलयं करोतीति किं० तदोजसो नलप्रतापस्य तद
ग्रासो नलयशसश्च सिद्धौ सत्यां इमौ सूर्यचंद्रमसौ वृथा निःप्रयोजनौ
विति तदोजसस्तद्यशसश्च हेतोरिमौ वृथा सिद्धौ ताविति वा० सूर्यचंद्र
म्भ्यां पचकरणीयं तन्नलतेजो यशोभ्यामेव क्रियते० सूर्यतुल्यचंद्रतुल्य
श्चेतस्मिन् द्वयं परिवेषस्य कदाचित्कलापं दायदेस्फुरत्कैतवादिति ता
वेषु द्वादशणां व्यथालिखित तस्य ग्रंथस्य कुंडलनया लोपः क्रियत इत्यर्थः
॥१५॥ तस्य नदान्यत्वं वर्णयति । अयमिति ॥ सन्न्यपो नलः अर्थिजनस्य या
चकजनस्य ललाटे जाग्रतीं स्फुरंतीं वेधसीं ब्राह्मीं इति लिपिं मृष्यो
षामिथ्या न चक्रे किंतु दृष्ट्या ब्रह्मणा लिखि० तां सत्यामेव चकार ॥
इति किं ॥ अयं याचकलोको दरिद्रो निर्धनो भविता भविष्यतीति

॥१२॥

वैध्यसीलिपिः तर्हि तस्यानौदार्यप्रतीतेः कथं वदान्यत्वमित्याशंक्यो
क्तिर्भंग्या समाधयते ॥ किं दत्त्वा दारिद्र्यदरिद्रतां प्रतीयनिर्माय वैधसी
लिपीं मृषा न चकारेत्यर्थः ॥ तथा अल्पितकल्पपादपः अल्पीकृतः क
ल्पवृक्षो याचितमेव ददाति नलस्त्वयाचितमपि अतो वदान्यतम इत्य
र्थः ॥ नलराज्ये कोपि दरिद्रो नाभूदित्यर्थः ॥ यद्वाऽकल्पितं दैधनं दत्त्वा वै
धसीं लिपिं मृषा न चक्रे अपि तु सत्यवानेवेति काकुः ॥ अख्यिते हि
तत्करोतीति ण्यतानिष्ठा ॥ ७५ ॥ प्रकारान्तरेण पुनरपि नितरां वदान्य
त्वं वदति ॥ विभज्येति ॥ तेन नलेन तत्तस्माद्द्वाभ्यां फालाभ्यां भागाभ्यां ब
द्धाः संयताश्चिकुराः केशा एव निजं श्वेतं अयशः अकीर्तिस्तस्य युगं
अमानि अमन्यत ॥ शिरसि सीमंतस्योभयभागे स्थिताः केशा न भवं
ति किंतु अकीर्तिद्वयं तेन तत् किं यद्यस्मात्तमया नलेन मेरुर्हेमाद्रिर्वि
भज्य खंडशो विधाय अर्थिसात् याचकायत्तोऽर्थ्यधीनं देयं वा न कृ
तः तथा सिंधुः समुद्रः उत्सर्गजलैर्व्यये दानक्रियमाणे ये जलव्ययाः
जलदानानि तैः मरुः निर्जलदेशः न कृतः दानं हि जलपूर्वकं भ
वति ॥ यद्वा मरुः उत्सर्गजलव्ययैः सिंधुः न कृतः तदकरणाय अय
शस्थाने द्विफालबद्धाः केशा एव जातोऽस्यर्थः ॥ सर्वस्वदानेपि याव
देतद्द्वयं न कृतं तावत्तन्न तुतोषेति भावः ॥ एतेनास्यायशलेशोऽपि ना

॥१२॥

।स्तीतिसूचीतं॥ लौकिकोक्तिरपि अपनेकीर्त्तिः शिरसिस्थितेति॥ अर्पि
साद्दिसत्र तदधीनवचनेदेपेः सूचेतिसाद्दि॥ फलि शब्दादयकीर्त्तिः॥१६॥
अयं देवो राजा नलः दिने दिने प्रतिदिनं उदयं अधिकामस्तिवक्रिं दधौ॥
किं कुर्वन्॥ कविना काव्यकर्त्रा बुधेन विदुषा वैयाकरणेन समं सह मु
दैव हर्षेणैव कालं नयन् गमयन् किंभूतेन कविना बुधेन च अजस्रं स
र्वदा अभ्यासं कारणव्याकरणव्यसनं शास्त्रमननव्यसनं उपेयुषा प्राप्त
वता अभ्यासमिति पाठे नलसान्निध्यं पटीयान् कविनादस्यासवाञ्छं
आक्षेपादिसमर्थः॥ पुनः किंभूतः दीनेश्वरश्री दिनेश्वरः सूर्यस्तद्व
त्श्रीः शोभा यस्य अतएव दिनेश्वरोऽपि कविना शुक्रेण बुधेन चंद्रपु
त्रेण सह प्रातरादिसमयं कुर्वन् पटीयांस्तेजस्वी तमोनाशसमर्थः॥ प्र
तिदिनमुदयं धत्ते॥ बुधशुक्रौ सदा पूर्वं रात्रिस्थाविति ज्योतिर्विदः प्र
धानात्वां समयं सम्यक् अयं शुभानां हविर्धिं नयन् प्राप्नुवन्॥ अयं प्रति
दिनमुदयं न दधावपि तु दधावेव। अभ्यासो व्यसनैर्नैतिकेतिविश्वः॥
अत्रस्थमिति न भूः॥ पूर्वोऽजसे नमिकंपातिरः उपेयुषेति उपेयिवान
नाश्वाननूचानश्चेति साधुः॥ उपेयुषे साद्दिसमितिसहार्थे योगे तृतीया
॥१७॥ तस्य सामुद्रिकलक्षणमाह पद्मयोर्विधेति॥ किमिति संभावे
नायां वेधस्याश्लक्ष्णा अस्य नलस्य पदं चरणः इति हेतोरूर्ध्वरेखया
लक्षणभूतया कितं किं इतीतिइदं नलपदं कमलप्रवालयोः पद्मपल्लवयोः

क्रमलविद्रुपयोः या अद्यो विधानात् ० अनलस्मिन्म्यल मृदुलैरथः कर
णात् धिक्कारात् तथा तापपनाखिल लक्ष्मं। क्षमाम्बुजों समस्तभूस्ततां
शिरस्सुदानात् स्थापनात् क्रमेणोर्ध्वं उद्दहस्थमुपरिस्थ पुरा भवतीत्यभि
ष्पति ॥ यावत्सुरानिपातयोर्लङ् इति भविष्यदर्थे लङ् ॥ राज्ञां शिरस्सुदानं
नाम कर्म्म प्रवर्त्तते नं ॥१८॥ तस्य नयः संधिमाह। जगदिति ॥ अयं नलः
शेषावशेषावान्शेषवस्य शेषं विधेयैतेयस्य एवं भूतः ॥ शोडशाब्दे
शीयः जगतोऽस्य समग्रस्य भूमंडलस्य जयं विजयं प्रणीतवान्स्तवान्को
शं भांडारगृहं तेन च विजयेन अक्षयं परिपूर्णं स्तवान् तेन चेति प
देनानुषंगिकं क्षेलेणयाद्योऽसते ॥ दानशूरस्य तस्य पूर्वमेवोक्तत्वात् ॥
भांडारगृहस्यैक्षयत्वं आनुषंगिकं न तु मुख्यं न वयं स्वैस्व भावत्वेन रा स्व
जानीतिध्वनितेन शात्रराहित्वं सूचितं ॥ दमयंती लाभस्तु वक्ष्यते ॥ ॥१३॥
॥१३॥ अथ जगज्जयानंतरं यौवनं तारुण्यमस्य च वपुः शरीरं तथा आलिं
गात् ॥ अयौवनं प्रापेत्सर्थः ॥ शरीरं कर्तृ यौवनं कर्मभूतं प्रापेति वा ॥
अनेन यौवनमलंकृतं ० न तु तत्तेन तथा रतीशस्य कामस्य सखामि
त्रं ऋतुर्वसंतो वनं आश्लिष्यति ॥ यथा स्वत एव रमणीयं वनं वसं
तमुद्दीपयति ॥ तथा यौवनं कर्तृ शरीरं कर्म उद्दीपयतीत्यर्थः ॥ शरीर
मपि सौंदर्यात् कामस्य मित्रं रतीशस्य ऋतुराजस्य कदृति प्रसक्ति भावः ॥१७॥

शरीरवर्णनमेवक्रमते ॥ अथारीति ॥ तदंघ्रिणा तच्छुरणे नपसेषु कम
लेषु ध्वणा गुरुप्रसादया ॥ अधारि ॥ पदौ नलं चरणाच्छुरणस्य वामायेषां ०
सामुद्रिकलक्षणं नापदिमांतीति नापयानि मुख्यो भानामेनलक्ष्मि
कानि मामाश्रित्यैवयानिवर्त्तते तैः सह स्पर्द्धा मया कथं कार्या स्यं तोक्र
मेण सतोनिशोभनत्वात् गुरुसा ॥ आश्रितत्वाच्चकरुणापन्नात च्छुरणशो
ना अधिकेत्यर्थः ॥ पल्लवेभ्रवाले तच्छयच्छायपल्लवोपि तस्य नलस्य योहस्तः
तस्य छाया कांतिः तच्छयच्छायं तस्य लवाले शोपिकं कुतः पदोलवपल्ल
वः ॥ शरीरविसरष्ठा अवयवचरणशोभाले शोयत्र वर्त्तते तत्र शरीरोत्कृ
ष्टाऽवयवपाणिशोभाले शोपिकं कथं हीनेन सह सम्यक् योगादित्यर्थः ॥
एतेन पल्लवाकरशोभा चाधिकेत्यर्थः ॥ किं शारदः शारदिनवो निर्मलः
पार्वणः पर्वणि पूर्णिमायां नवः संपूर्णकलः शोरीश्वरो निशानाथश्चं र्व
द्रः तस्य नलस्यास्यं मुखं तस्य दास्यत्वेपि सेवकत्वे ० अधिकारिता पा
त्रत्वं न गतः न प्राप्तः ॥ किं तु तत्साम्य चंद्रस्य शारत्पूर्णिमारात्रियोगात्प्र
मणियत्वं ॥ अस्य तु स्वत एव ० शारदत्वस्य त्वादयेस्ष्ठा लुमत्राक्यत्वात्
साम्यं नलेनेइति वा रमणीयनायकस्य रमणीयेनैव दासेन भाव्यं न
चास्य पूर्वोक्तप्रकारेणैव तत्तुल्यत्वं ॥ अतो दास्यत्वमपि तं प्रापेति भावः ॥

निर्मलत्वात्संपूर्णत्वात्कलंकस्यास्पृष्टत्वादिति भावः श्रीप्रधानेत्याद्या ॥ अस
चतुःषष्टिकलत्वात् ० शारदः पीतमूहे स्यात्फलिने प्रतिभे नवे । तच्च यच्छा
येति विभाषा सते स्यादि नानपुंसकत्वं । शारद इति भानार्थे संधिवेच्छे
सन्तु पार्विक इति भावार्थे कालाहरणं ॥ पार्वणइति पाठे संबंधे ऽणि अ
णीति अस्ति भावः ॥२०॥ प्रकारांतरेण सामुद्रिकलक्षणत्वमाह ॥

किमिति ॥ विधिः ब्रह्मा रोम्णां कपटेन मिषेण सार्धत्रिकोटिभिः रेखा
भिः अस्य नलस्य गुणान् शौर्यदानादीन् किं नाजीगणत् । गणयामा
स काकुः ॥ गुणगणनया एकैक ब्रह्मणा एव लिखिताः न तु रोमाणि
अनेन सर्वगुणसंतस्य घोतितं ० दोषराहित्यमाह ॥ जगदूता ब्रह्मणा

॥१४॥

रोमकूपौघमिषात् रोमकूपसमूहव्याजेन दूषणशून्यबिंदवः ॥ दू
षणानां शून्यानि अभावास्तत्प्रापकाबिंदवश्च न स्ताः किं तु एव ०

॥१४॥

यत्र किमपि न तत्र ज्योतिर्विद्भिः शून्यसूचको बिंदुर्वै क्रियते ॥ तथा
रोमकूपा अपि नलस्य लाबिंदुत्वेनोत्प्रेक्षाते ॥ अयं तौ न समूहो न किं तु
दोषराहित्यसूचकाः शून्यबिंदव एव लिखिताः तिस्रः कोट्यो र्धकोटि
श्च यानि रोमाणि मानुष इति । तावंतः कूपा इति रोमैकैकं कूपक
पार्थिवानामिति सामुद्रिकलक्षणत्वं सूच्यते ॥ अजीगणत् ॥ एयंताच्च

डिलेद्द्वेगणः ॥२१॥ अमुष्येति ॥ अमुष्यानले [illegible] स्यामरिदु
र्गलुंठने अरिणां दुर्गाणि गिरिप्रकारास्तेषां लुंठने [illegible] ग्रहणे क्रियमा
णे सति अर्गलदीर्घपीनता अर्गलस्य च दीर्घ चत्वसीनं च तस्य भावस्त
ता कर्मधारयो द्वंद्वो वा ॥ साग्रहिता ध्वजं ग्रहिता न तु ध्वजं प्रायेण ॥ तत्र
त्रैवारिदुर्गलुंठनेष्वमुष्य उरश्रियावक्षस्थल [illegible] यागोपुरे स्फुर
दीप्यमानं यत्कपाटं तस्य दुर्घर्षता कठिनता तिरः प्रसारिता विशाल
ता च ग्रहिता किं अनेन तस्या जानुबाहुत्वं व्यूढोरस्कत्वं अनाकलनीय
त्वं च ध्वनितं । लुंठने समर्थ एवाग्रणीर्भवति पुरोवर्त्ति सारं वस्तु गृह्णा
ति ० तद्दिष्टं गोर्गलं ननेस्समरः ॥ पुरद्वारं च गोपुरमित्यमरः ॥ उभयत्र क
र्मधारया तु ॥२२॥ स्वकेलीति ॥ तन्मुखस्य प्रतिमा स्वरूपमुपमानं वा ॥
चराचरे स्थावरजंगमात्मके जगति नास्ति ॥ चंद्रपद्मानुपमानं चेत्तत्रो
ह ॥ कथंभूतस्य तन्मुखस्य स्वेति ॥ स्वकीयाया केलिः क्रीडा तस्याः लेशो
लवो यस्मिन्नेतादृशे तस्मिं तं च तेन निर्जितः इंदुर्येन तत्तथा निजः स्वकी
यो योंऽशः भागस्तद्रूपे ये द्वे नेत्रे ताभ्यां विनिर्जितानि न्यक्कृतानि अधः
कृतापद्मानां संपत्समूहः सौभाग्यं वा येन चंद्रपद्मास्तिरस्कृतमन्यदुपमा
नं न विष्यति चेत्तत्राह ॥ अतद्द्विपीति ॥ चराचरविशेषणं । तयोश्चंद्रपद्म

योर्द्धपीतस्याः जीवरं त्रयनत्रीलं न विद्यते तद्वयी जीवरं सुंदरांतरं अ
न्यत्सूदरं वक्त्रं यस्मिन् जगति मुखस्योपमानं द्वयं चंद्रः पद्मं च तदपि
त्कं व स्वांतरं नास्ति तद्वयमेतत्तन्मुखेन अंशाभूतेन सत्वानि निर्जितमि
ति समग्रस्य तन्मुखस्योपमानं नास्तीत्यर्थः॥ चराचरस्या जगतीति
विश्वः॥ जित्वरमिति येन शाजितीति करप्॥ अन्यत्सुंदरं सुंदरांतरमी
तिमयूरव्यंसकादित्वात्समासः। चराचर इति पक्षे सर्वो द्वंद्वो नसैक
वद्भावः॥२३॥ पूर्वोक्तमर्थं पुनरप्याह॥ सरोरुहमिति॥ तस्य मुखावय
यव भूतया दृशैव सरोरुहं पद्मं निर्जितं तस्मिन् तेनैव विधोरपि
चंद्रस्यापि श्रियो जिताः परं चंद्र पद्मातिरिक्तं अन्यद्द्रव्यं सुंदरं वक्त्रं
कुतः कुत्रसं अतएव तदाननं तस्याननं लाननस्योपमितावुपमानेम
हीयसि दरिद्रता। अहो महदाश्चर्यं असंता तावदस्यर्थः॥ महीयसि
मिति पाठे कविना महती दारिद्रता भाव्यमिति नेव्यंगेयेति सिपा
तनं योहि यस्मान्निकृष्टो भवति स तेन दृश्यैव लर्पते स्मितेन अ
त्योपहासेनैवाध्यः क्रियते च॥२४॥ स्तनालेति॥ एवंत्राब्दोप्यर्थः ५
चमरीपश्चरपि पुनः पुनः पुच्छविलोलनं चलनात् पुच्छस्य विलोल
नं तदेव व्याजो मिषं तस्मात् खवालानां रस्य स्वस्य वालाः केशाः तेषां ता

(१५)

(१५)

रःसमूहः तस्य अनागसे अपराधाभावाय वा तस्माच्चापलो भवतीति तस्य
चापलं अपराधाय नेति मातायधारासिति तद्भ्रमरीणां कुलं चंचल
व्याजेन स्वबालतायाः स्वापराधो नास्तीति कथयति॥ कथमपराधि
त्वं तस्य सत आह॥ किंभूतस्य स्वबालभावस्य तदुत्तमांगजैः तस्योत्त समं
मांगे शिरसि जाताः केशास्तैः सह तुलां मिलितां [illegible] ग. तुलां साम्यमभि
लषति० एवंशीलस्तस्य स्वयं बालं सन् मातासाम्यमिच्छति तदा
तन्माता बालेनाज्ञानादिदं कृतं क्षम्यतामिति वदति तद्भ्रमरी वा
तन्मातृस्पेति अनयोरभेदात्॥ उत्तमांगजैरिति सप्तम्यां जने इति डः
अमूर्द्ध मस्तकादिति अलुक्। बाहुलकान्न भवति। अनौ
गस इति क्रियार्थेति क्रियथापत्ति अतीसादीनां संप्रदाने
चतुर्थी। चपलशब्दस्य गुणवाचित्वात् चापल्यमिति भावे त
थापि युवादित्वादणि चापलमिति साधु॥२५॥ महीति॥ तत्र अन्ये न
ले जगत्रयी [illegible] त्रिलोकी समुत्पन्नानां तथा भुवां सुंदरीणां पूर्वोक्तेन
प्रकारेण द्विधा मन्मथविभ्रमः कामविभ्रमो अभूत् जातः विशिष्टो
[illegible] भ्रमो विभ्रमः विलासश्च कामस्य विशिष्टो भ्रमः कामजनि
तो विलासश्च तदुभयं कथमित्यपेक्षायां यथाक्रमेण। हर्तस्य मही
भर्तो राज्ञो नलस्य मन्मथश्रिया कामसदृशया शोभया नवेन रखियां नः के

रणेमदनीयमिति भ्रांतिः॥ तथा निजस्य स्वचित्तस्य अंतःकरणस्य तं प्रती
च्छया इच्छाभिलाषेण कामजनितो विलासः कुपश्चादिरिति कामजनितवि
वैविध्यः महीभृत्तसंबंधषष्ठ्या मन्मथपदेनान्वयात् नृप इति विषय
सप्तम्या मन्मथपदेनान्वयात्॥ नृप इति विषयसप्तम्या मन्मथविभ्र
मपदेनान्वयान्न पौनरुक्त्यं चोपरसमुच्चये जगत्त्रयीस्तुवमितिसा
मान्येनोक्ते पतिव्रतादिरहितामिति ज्ञेयं॥ एवं न कोपि निपीसादाव
पिज्ञेयं॥ यद्वा अन्यथा त्रिशिप्रिये वेति चकारमेव वकारार्थं व्याख्याय
द्वितीयं॥ समुच्चयार्थव्याख्यायां पतिव्रतानां मन्मथोपमितिनिरस्ति
लाषो विशिष्टो भ्रमो जातः अन्यासां तु तं प्रतीच्छयापीति द्वैविध्यं इ ॥१८॥
५१७॥ ति॥ अतो चितिपरिहरणीया॥ विभ्रमो भ्रांतिलावयोरिति विश्वः॥
घा मननं मनस्तत्राप्यस्यां सा प्राजन्यं ज्ञानं मनः मथ्नातीति इति मन्मथः म
न्मथ्नातीति वा॥ मूलविभूजादित्वात्॥८५॥ इदानीं क्रमेण देवांग
नानां मर्त्यांगनानां नागांगनानां कामविभ्रमं श्लोकत्रयेणाह॥
नीमीलत्सादिना॥ त्रिदशीभिर्देवांगनाभिः योऽभ्यासभरोऽभ्या
स्यातिशयः निमीलनं नेत्रांजुषा निमीलनस्य नेत्राः नेत्रसंको
चस्याभावः तं जुषतीति निमीलनं मेषजुट् तयादृशा तं नलं नी
पिपसादरं दृष्ट्वाऽर्जितः स्तः अमृतस्त्रिदशयः तमभ्यासभरं निमे

षनिस्वैः निमेषदरिद्रैः लोचनैः स्पृश्यमानाऽपि विवर्णवती प्रकटयं
ति॰ देवानां सहज एवनिमेषत्वं नलावलोकने उपक्षीणमिस्मत्रे
क्षितं ॥ पद्दस्तं तमस्पस्तं तर्केणापि न विस्मयं ते । त्रिदशीति पुंयो
गलक्षणो जातिलक्षणो वा ङीप् ॥२७॥ अदद्दति ॥ चक्षुःश्रवसां
नागानां प्रियाः स्त्रियः नले नेनिमित्तं आसनस्तत्सदृशो दृश्यं इति पू
र्वोक्तप्रकारेण हृदयमनसा स्रवंति । स्मविदंति स्म । इतीति किं । अदः
इदं नोऽस्माकं दृश्योदृश्यं तत् कर्णिन् नलमाकर्णयति एवं श्रीलं सतत्
फलाद्यं जीवितं फले नाढ्यं जीवितं यस्य स फल्गु जीवितमिस्य ऐः ॥
तदवीक्षितं नलं न विक्षते एवंभूतं सततं अफलं निष्फलमिति
पाताले स्थितानां नलाकर्णनं भवति नतु विक्षणं ॥२८॥ विलो
केति ॥ मर्त्याभिर्मानुषिभिः अमुष्य दर्शने अवलोकने निमेष
निर्मितो नेत्रनिमीलनं रचितो विघ्नले शोपि नालं भिनं प्रापि ॥
किंभूताभिः मानुषीभिः अजस्त्रभावनाबलाद् अजस्त्रं निरंतरं
या भावना या वासना चिंतनं या तद्दशात् अमुं नलं नेत्रनिमीलने
अपि नेत्रसंकोचेऽपि सततं विलोकयंतीभिः पश्यंतीभिः यो हियं

स्मरति सनेत्रगोचराभावेपि तमेव पश्यति ॥ मर्त्याभिरपि योग्यत्वात् ऊ-
पू० अलं नीसत्र नो भक्ष्यसन्तु वनौ विभाषासमुच्चये नो रीति तु मे ॥ २९ ॥
इदानीं पतिव्रतादिव्यतिरिक्तानां सर्वासामपि मुग्धादिक्रमेण नलेऽनुरा-
गमाह ॥ नेति ॥ कास्त्री निशीरात्रौ स्वप्नगतं स्वप्नप्राप्तं नलं न ददर्शापि
तु सर्वापि का च गोत्रस्खलिते नाम न्यस्ये नाम । भ्रांतौ तं नलं न जगा-
द । अपि तु सर्वापि च परं रते संभोगे तन्मुमता ध्यात ध्वानस्य नलस्य आ-
त्मरूपं यस्य तस्य भावस्तत्ता नलस्वरूपेण ध्यातोऽथ वो प्रियो यया एवं-
भूता सती का वा स्वप्नमनोभवोद्भूतं स्वस्य मदनोद्भूतिं न चकार ॥ अपि
तु सर्वापि स्वप्रिये नलभार्यस्त्वौ रमे स्पर्धः ॥ क्रमेण मुग्धादीनां न के-
चित्तानुसंगोदद्दितिः । वहयो युवतयो नलमेव स्वप्नगतं ददृशुरिति स-   ॥ १७ ॥
र्पः ॥ नाम गोत्रं कुलं गोत्रं गोत्रस्खलनधरणी इत्यादवप्रकाशः ॥ ३० ॥
॥ २७ ॥   इदानिमन्यस्त्रीणां तद्योग्यत्व प्रतिपादनपुरः सरं नैमीप्रसंगं कु-
र्वीति ॥ प्रियेति ॥ कयासुरूपया स्त्रिया नैमीसमको दर्पणः आदर्शः
श्वासमलीमसः श्वासेन मुखवायुना मलिनो न कृतः अपि तु नैमी-
व्यतिरेकेण सर्वाभिरपि कृतः अयोग्यत्वात् ॥ किंभूतो दर्पणः तं नलं चि-
त्रादावालोक्य इति विचार्य स्वमात्मानमपि इस्तितुमवलोकयितुं करे
हस्ते धृतः इनीति किं प्रियाशीलया अस्य नलस्याहं योग्या सदृशी स्या

मिति काकुः किंभूतया कया अपदर्पयागत गर्वया ० तमालोक्य गत गर्व
येति वा अन्वयः भैमीसखकास्सर्वापि गतदर्पा जाताः इत्यर्थः प्राप्तरूपस्व
रूपा। भीरूपाब्द्धमनोज्ञयोरिति समरः ॥ निहा येति स्यबं सूत्ररूपे निपा
तः विनार्थे प्रशस्यप्रयोगशिष्टप्रयोगदर्शनात् ॥ ज्योत्स्नातमिस्रेति म
लीमसेति निपातः ॥३१॥ नलेनैमी मनोलिप्तलाषमाह ॥ पथेति ॥ वय
सा पक्षीणा गरुडेनेन उह्यमानः प्रथमानः मदनः प्रद्युम्नः प्रसह्य बला
त्कारेण वैरोचनिजस्यपतनं बलिपुत्रस्य बाणस्य शोणितपुरं यथा ग
रुडेनैव वेशितः प्रवेशितः तथा नयसेवना रूढ्यपनैन विदर्भजाया द
मयंसामनः कर्म प्रसह्य रौत्रावसमयं क्षांलामदनः प्रवेशितः खलु वा
क्यालंकारे प्रसिद्धौ वा ॥ किंभूतेन गरुडेन भोगभोजिना भोगं सर्पश
रीरं भुंक्ते एवंशीलस्तेन ० तारुण्यपक्षे भोगं सुखं भुंक्ते भोक्ता वा ॥
तच्छिलेन; किंभूतं पतनं ० अनलेनाग्निना रुद्धं समंततो प्राप्तं ० भै
मीमनः पक्षे नलेन अवरुद्धं आक्रांतं चित्रादौ दृष्टं स्तुतं च नलेमन
सि निधाय ० कामपीडीता जाते सर्पः ॥ कामः कीदृक् ० तारुण्य चिनै
रुह्यमानस्त वर्धमानः प्रसह्योति तत्र पर्यायं ॥ पक्षे सहेत्य पृ ॥ बाणासु
रकन्याविवाहे अनिरुद्धे श्रीकृष्णनप्तरि बाणेनावरुद्धे नारदवचना
त् बालप्रद्युम्नसहितः श्रीकृष्णो गरुडमारुह्य अनिरुद्धमोचनार्थं

॥९८॥

शोणितपुरं गत इति विष्णुपुराणं ॥ गीतिपाठे योगिनः सर्पास्तोगकुस्ता
न्विलासिनश्चेति स्वगबाल्यादिनो वपद्मसमरः ॥ ३२ ॥ तमेव प्रकार
मेवाह ॥ नपद्म इति ॥ सा भीमनन्दनं द्रस्य नंदिनी दमयंती तस्मिन्नले मनः
विशिष्याऽन्यस्त्रीभ्यः सकाशात् अतिशयेनान्यन्नपेभ्यः आद्रष्य
वादिदेश । निदधौ । किंभूतेन नृपेण निजरूपसंपदा स्वकीयसौंदर्याधि
कानां अनुरूपे योग्ये तथा बहुशो अनेकवारं श्रुतिं श्रवणगोचरं
गते प्राप्ते ॥ किंभूतं मनः मनोभवस्य कामस्याज्ञया एकं मुख्यं वशं
वदं प्रवाणं ॥ कामाज्ञाकारकमित्यर्थः ॥ मदनायत्तत्वान्नलएव सं
लग्नमित्यर्थः ॥ रूपं च संपच्चेति वा ॥ बहुश इति संख्यैकवचना
दिति शस् नंदीनीति नंद्यादित्वात् ङीप् ॥ वशंवदमिति प्रियवशे व
दः खच् द्विषत्स्येति मुम् ॥ ३३ ॥ उपासनामिति ॥ सा भैमी स्वावस
रं सख्या दिने दिने प्रतिदिनं पितुरुपासनां सेवां सौ आगत्य बंदि
नां अवसरेषु समयेषु जल्पतेस्माद्भुरक्तावभूवेत्यर्थः ॥ तेषामव
सरेन लाकर्णन संभवादित्यर्थः ॥ तदेवाह ॥ तेषु बंदिषु प्रतिभूप
तीन् अन्यान् राज्ञो पठत्सु स्तुतिपूर्वकं वदत्सु सत्सु ॥ सा भैमीन
लं भजन्वती सती अलमत्यर्थं विनिद्ररोमाऽजनि उत्पुलका जाता ।
श्रवणानुरागः सात्त्विको भावश्च दर्शितः ॥ उपासनेति णन्यासश्चेति

॥९८॥

107

मुच्य ॥ रूप्यतद्दति स्वारते तौ आदिकस्य रंजेरूपं रूपतीन्प्रति लक्ष
णे कर्मप्रवचनीयत्वं विनिःक्रौ रामेति नांतं डाबंतं नाऽजनिति दी
पने जति कर्त्तरि णिंच् ॥ जनिवध्योश्चेति निषेधाद्वृध्यभावः ॥३४॥
कथेति ॥ मिथः परस्परं कथानुषंगेषु कथाप्रसंगेषु सखीमुखा
त्स्वेणेपि विषये नलनाम निशम्य आदमयंत्या श्रुते सति अनया तन्व्यौ व्यन्व्या
मुदा हर्षेण तस्य नलस्य आकर्णने श्रवणे सज्जौ तत्परौ कर्णौ यस्याः
एवंभूततया अभूयत जाता किं पुनर्वाच्यं नलेन्टपवर्णने सज्जकर्ण
त्वं ॥ किं कृत्वा अन्यत् कथांतरं कार्यांतरं वा अश्रुतं झटिति विधूय परित्य
ज्य पूताः मयि स्नेहात् नलराजकथामेव कथयंतीति ज्ञात्वेत्यर्थः ॥
तन्व्येति विरहव्यथया ह्रस्वा दमभूपतनूजा तनुगात्रेण पदं ॥३५॥
स्मरादिति ॥ सा भैमी इति पूर्वोक्तेन विन्यासेन पुनस्तरुणानस्तवे
ताजनेन सखीजनादीनाप्रयोज्येन नैषधं नलं तदास्पदे मदनस्थाने
निदर्शनं दृष्टांतं तमभ्यषेचयत् ॥ स्थापयामास ॥ इतीति किं ॥ तेज
न पराभोः पराहता असवः पस्यत स्मान्मतान् अतएवानिमेषलो
चनात् निमेषरहितनेत्रात् स्मरात् कामादहं बिभेमि ततस्मादि

२ त्त्वं अन्यदृष्टांतमुदाहर ॥ वदेति ॰ तेन ए... सती ॰ नलो दृष्टांतेन स्था
पयामास असौ राजा कामोपम इति जनो यं कंचन स्तौति तदा भैम्या इत्या

काममनुपमानं सक्वानलमुपमानं करोतीत्यर्थः॥ अन्यस्योपमानाभावान्नल
मेवृदृष्टांतं जनो ददातीत्येति भावः॥ तस्मात्स्मराद्भिन्नमित्येकं पदं वादे वन्ला
मे सूदृष्टांतं दनिमेषत्वं मतत्वेनोत्प्रेक्षितत्वं मतस्परा जादेः स्थानेऽन्योऽपि विधीयते स्म
रादिति भीत्रेसपादानत्वं अस्यादइति आस्पदं प्रतिष्ठायामिति साधुः मेष
ध्यमितिनिर्षेध्यानामधिपमिति संबंधमात्रेऽण् प्रकरणादिना च स्वस्वा
मिसंबंधाधिगतिः निषेधानां राजेत्यर्थे जनपदलक्षणाबंधके ना
दिक्षात्कुरुनादितिण्यनैषध इति स्यात्॥ अभिषेचयधिस्तत्रप्राक्सि
तेनिषधं ॥३८॥ नलेति॥ अनया भैम्या निषधागताः निषधदेशादा
गताः दूतद्विजबंदिचारणाश्चार विप्रस्थतिपाठकादेशांतरगमणा

॥१८॥ ॥१७॥

जिविनो नलस्य गुणान्सौंदर्यादीन् जवतां देशेकोराजा कीदृक् गुण
णः कथं प्रजाः पालयतीति मिषेण व्याजेन स्पष्टा अथ प्रस्नानंतरं त
त्कीर्तिकथां नीपीयन्नलयशोवर्णनमाकर्ण्यानया भैम्याचिराय विम
नायमानयाहृष्टचित्तया दुर्मनायमानया तस्थे स्थितं इदृग्गुणो राजा
मया कप्राप्स्यत इति विमनस्कता आकारणप्रश्लेषेणाऽविमनायमान
याजातं॥ चिरमाकर्णयंत्येव स्थिरचित्तयाऽवस्थितचित्तया जातमिति
व्याख्येयं॥ तत्कीर्तिसुधामिति पाठः॥ चीरायनीपीयेति संबंधः अथ
कथितं चेति द्विकर्मकत्वा प्रधाने कर्मणि निष्ठा तथाऽभिहितत्वा

न्नद्वितीयाः चारणइति गुणानिनलोके इति षष्ठीनिषेधात् द्वितीया ॥
तस्य इति भावोक्तेः ॥ पक्षे नीपीयत इत्युक्तमुत्सुक्याद्यादास्वामिनीव
कल्पक्ष कालपवल्पए ॥ विमनायिद्वाचरतीतिकर्तृः कइदसलोपश्च ।
अस्य सर्वधातुकदीर्घः ॥ डिलास्खाना च ॥ ३७ ॥ पूर्वश्लोकपंचकेन भै
म्यानले श्रवणानुरागं प्रतिपाद्येदानीं लिपिस्वप्नादौ दर्शनानुरागं प्र
तिपादयति ॥ प्रीयमिति ॥ सा भैमी इति स्वाङ्गरूपा कारुवरेण कुशलेन
लिपिकर्त्रा प्रयोज्येन लिखितं नलस्य स्वस्याग्रे नश्च सरव्यं रूपसाम्य
मा क्षतेस्म पश्यतीस्म ॥ इतीति किं ॥ हे कारुवर त्वं अधिलीलागृहभि
त्ति लीलागृहं क्रीडागृहं तस्य भित्तौ विन्नन्तस्य पार्श्वे प्रेमीत्तावः ॥ प्रियंना
यकं प्रियां नायकां च उभौ कावपि अदृष्टनामानौ लिख ॥ किंभूतौ
त्रिजगज्जयीमिथुनयो ॥ त्रयाणां जगतां समाहारस्त्रिजगत् तज्जयती एवं
शीलं श्री शोभा ययोः जगत्रय्यां मानवानेव सुंदरावितिपश्यतीस्मेत्सं
ति भावः ॥ जयास त्रजिगि क्षितिनपुंवद्भावः ॥ ३८ ॥ मनोरथेनेति ॥
स्वपतीनि द्विता सा भैमीमनोरथेन वांछया स्वपतीस्रतं अस्वपतिः
स्वपतिः संपद्यतेतथा ततः स्वप्राणेश्वरी तं नलं कनित्रीकरात्रौ
न पश्यतीस्म ॥ अपितु सर्वस्यामपि ॥ द्विवादृष्टस्य स्वप्ने दर्शनाकदा
प्यदृष्टस्य कथं दर्शनमित्यर्थे हेतुमाह ॥ अदृष्टमिति ॥ सुप्तिः स्वप्नःक

दाचिददृष्टमप्यर्थं अदृष्टवैभवात् धर्मी धर्मं भाजनदर्शनातिशयेन ज-
न्मस्यदर्शनगोचरं करोति। यददृष्टं दृश्यते स्वप्ने नानुभूतं कदापि नेति मा-
येन जन्मांतरानुभूतं समुत्पन्नसंस्कारमस्मिन्जन्मनि॥ अथ दृष्ट-
मप्यर्थं धर्मी धर्मी वेव दर्शयतीति भावः॥ चित्रादौ नलदर्शनेऽस्यापि
साक्षात्तद्दर्शनाभावाददृष्टत्वोक्तिर्युक्ता॥ साक्षाच्चित्रे तथा स्वप्ने तस्य
स्याद्दर्शनं त्रिधेति। अत्रतूत्तरं प्रकारद्वयं॥३७॥ निमीलितेति॥
निद्रयेव सुषुप्त्येवास्या भैम्याः स महीपतिः नलः महः अहस्यं अदर्शि
दर्शितः किंभूतः कदापि जाग्रत्स्वप्नावस्थयोरपि एवं रूपत्वेनावी-
क्षितोऽदृष्टः किंभूतात् निमीलितान्मुद्रितादक्षियुगान्नेत्रद्वयात् सं-
गोप्य सम्यग्गोपयित्वा तथा बाह्येंद्रियमौनमुद्रितात् बाह्येंद्रियस्य च-
क्षुरिंद्रियस्येव मौनेन स्वविषयग्रहणाभावेन मुद्रितादुपल- ॥२०॥
क्षणं विषयग्रहणेऽशक्तात् […] अपि मनसोऽपि संगोप्य अक्षियुगं मनसो-
॥२०॥ ऽपि ज्ञातुमदक्षेति पावक। चरा […] अन्योन्यसमुच्चये कर्पं
महारहस्यत्वेन निरस्ति ज्ञायानं […] स्वरूपत्वेन निद्रया भैम्या साक्षाद-
दर्शितदृश्यः॥ ननु सुषुप्तौ मनसोऽप्यव्यापारश्चेत् तर्हि ज्ञानं कथं उ-
च्यते॥ स्वप्नार्थानां बाह्येंद्रियग्राह्यत्वाभावात् ग्राह्यत्वाभावे सुखा-
दिष्वंतर्भावाद् अस्यांतरत्वात् तावेपि […] सहत तेषु केवलाविद्यावृ-
त्तिरूपसुषुप्ति विषये तस्य युक्तत्वादात्मन एव तत्र द्रष्टृता ज्ञानरू-

पेण निस्सस्फुरणोपपत्तेः यद्वा नल एव जैस्यानुरक्तत्वात् प्राप्तिं विना
विषयमात्रस्यापि विरागसंभवात् सुखासंभवाद्बोधानंतरं च सुख
महमस्याप्यं न किंचिद्वेदिषमित्यनुसंधानस्यासद्भावान्नलवि
षयत्वमंतरेणैवमनुसंधानस्याप्युक्तत्वात्॥ सुषुप्त्यवस्थावत्रा
तूसनलयवममनिरतिशयानंदादरूपत्वेन स्फुरित इति॥ बोधा
नंतरं तया ज्ञातमिति भावः॥ द्वितीयश्लोकेऽपि चिह्नसुषुप्त्यावस्थाप्या
रव्यया॥ एवं पश्चात्क्रमं श्लोकत्रयेणावस्थात्रयेपि नलसाक्षात्का
रोवर्णितः बालत्वादतिगूढत्वान्नलविषयस्तदीयोऽनुरागः केना
पिन ज्ञात इति तस्य महारहस्यत्वव्याख्यानानंतरं च पूर्वस्मिन् श्लो
के स्वप्नावस्थो कामः ०नोरथेति श्लोके॥ मनोरथेन नलः पतिः स्व
तः तत्रैव स्वप्नावस्थायां दृष्टं नलं प्रति स्वयं नलमेव सा आह॥ नि
मीलितादिति॥ हे नल सः प्रसिद्धस्त्वं पतिः स्याः भवेति प्रार्थनायां लिं
ङ्॥ अर्थान्मम प्रसिद्धस्तु पुराणादौ से मीपतिर्नल एव न त्विंद्रा
दय इति॥ इंद्रादिपरित्यागेन नलस्यैव प्रार्थनायां संबोधने हेतु
माह॥ यतः अक्षियुगात् अक्षो विजितकोनिवासः यस्यास्तीति
अक्षी चोऽप्यर्थः॥ कक्षियुगादपिसर्थः॥ तद्युगं तस्मादाद्यस्मिन्न
अक्षी च किंभूता दक्षियुगात् निद्रयानिद्राजन्येनाज्ञानेन निमी

लितात्तिरोहितात्साध्यात्म दित्यर्थः॥ तथा अहृद॥ अज्ञानिनो जडात्
मुर्खादित्यर्थः॥ तस्मादपि वाक्यविलिन्न किंभूतादहृदः इंद्रियस्य वाग्रूप
स्य मौनव्यापाराभावः॥ तदेव मुद्रितं मुद्रास्वभावो यस्य परस्मात् मूका
दित्यर्थः॥ तल्लक्षणं माघे॥ सहजांधदृशः स्वदुर्नये परदोषेक्षणदिव्य
चक्षुषः॥ स्वगुणोच्चगिरो मुनिव्रताः परवर्णग्रहणेषु साधवः॥१॥
तथा रक्षस्य मरकस्यासंतं गोप्या मा लक्ष्मीर्यस्य तथा महानाहि पूज्या हि ए
तेषु संबोधनेषु पदत्रयमहे तुर्यपाय्यभूः संबोध्यं॥ किंभूतस्त्वं अदर्शि
संगः अं विष्णुं पश्यंतीति एवं शीला अदर्शिनो विष्णुभक्तास्तैः सह संगो
मैत्री यस्य पुनः किंभूतः अकदक्षप्यविक्षितः नकं अकं दुःखं क्षपयंती

॥२१॥

ति एवं शीलाः अकदायिनः स्वयं दुःखं ददति क्षपयंती चैवं शीलाः दुःष्टा
स्तेः रकदापि क्षितिरपि अविक्षितो न दृष्टः तत्संगरहितः इत्यर्थः॥ अत एव म
ही सर्वा देह्या हवा न रस्या इति मध्यमपुरुषसामर्थ्यात्त्वमीति ज्ञातव्यं॥
यद्वा कश्चैन कस्मै चिदाशिषं दद्यात्प्रार्थयते॥ स नाम महीपतिः राजा स्यात्त
वेति प्रार्थनायां लिङ्॥ य [illegible] प्रार्थ [illegible] हीपतिस्त्वं प्रसिद्धः॥ स्याः
अन्यत्पूर्ववत्॥ दमयंती संबोधन [illegible] विशेषण पदानि सामाना
र्थानि ज्ञातव्यानि इत्यलं॥४१॥ अमो इति॥ अहो कियद्भिर्दिवसैः कतिभिः
हि मा गमे पि हेमंतर्त्ताविपि स्मरार्दितां मदनपीडितां भैमीं प्रति लक्षी
कृत्य महीमा देर्ध्यं प्रपेदे प्राप्तः॥ विना वरं शिशिरात्रिपि स्तपर्त्तु पूर्त्तावपि

॥२१॥

113

निदाघनक्तं परेष्विमे दिवसा नराः मज्जाबाहुल्यं नक्षणया सह तुल्यं बिभ्रतां व
त्रूवी रेघ्वता ॥ हेमंतजौ दिनानि ह्रस्वानि रात्रयो महत्यः ग्रीष्मादिनानि
महांति रात्रयोल्पा विरहितमादिति बहिःकुसुमशरवक्षणातात्पतिविपरीता
तद्रुति अहो चित्रं इत्यर्थः ॥ अहो इसे दृतयामतिमध्यत्वं बिभ्रतां ह्रीसा
ल्लवश्च ॥ ४० ॥ इदानीं नलस्यापि तमागमनुरागमाह ॥ स्वकांतीति ॥ कदा
चित्कस्मिंश्चित्समये नलोपि लोकान्लोकमुखाद्दस्याः भैम्याः गुणोत्क
रं सौंदर्यादिगुणसमूहं अश्रृणोत् ॥ किंभूतं गुणनिबंधैर्यलोपिनं तत्क
णधैर्यलोपिनं श्रीलं ॥ तथा स्वेति । स्वस्याः भैम्याः कांतिकीर्त्तिव्रजः सौं
दर्यविषयो यशसोस्समूहः स एव गुच्छस्तान्मौक्तिकस्रक् मौक्तिकमा
लातस्याः अंतर्घटना नलमनसि घटनासंबंधस्तस्य गुणश्रियं दो
रकश्रीमां श्रियं तं गुणं । गुणोत्करेण नलचेतसि तत्कांकीर्त्तिगुम्फितेत्य
र्थः ॥ मालायामंतर्घटनार्थं दोरको भवति । यद्वास्य नलस्य तद्योगेन ल
रामणीयकानुरूपो भैमीगुणसमूह इति भावः ॥ मौक्तिकमिति विन
यादित्वात्स्वार्थे ठक् । पलोकादिति हेतौ पंचमी ॥ ४१ ॥ तमिति ॥ ततो भै
मीगुणश्रवणानंतरं स्मरः कामस्तमेवावसरं प्रस्तावं लब्ध्वा तया भैम्या
लक्ष्याने षध्यं नलं विनीजेतुं पराजयितुं द्वये षड्केत ॥ उ ॥ ईक्षते ॥ शरी
रिण्यानि जयास्वकीया अमोघशरत्वेन पतः स्वशरीरस्य मार्गेभातस्याः

।।१२।।

जयेन जातो मत्सरः क्रोधो यस्येति पराजयेच्छया कारणं जातः क्रोधो
वरीकमण्यवसरं प्राप्य तत्त्वा युधमन्वैरीणं पराजेतुं प्रक्रमते।। क्रो
धेदिति किंचिदिगणो निपातनाद्धाप्तुः।।४३ अकारीति।।तेन क्षमाभु
जा नलेन भैमीमन्तःपाम जानलयो भीमन्पस्य कन्या आन्यः स्वानमा
श्रयो यस्य एवंभूतो गुणः सौंदर्यादि श्रवणातिथिः श्रवणगोचरोऽका
रीस्तः।।आकर्णितिद्दत्यर्थः।।आदरातिशया पूर्वस्सूचनायात्तिथिप
दं।।स्मरेणापि गुणः असं चात्म त्रारासनाश्रयः स्वात्मनोपरुरासनं ध
नुस्तदाश्रयो आधारस्थानं यस्य एवंभूतोऽकारि किंभूतेन तस्य नल
स्योच्चं उहत्कष्टं धैर्यं तस्य व्ययो नाशस्तस्मै संहितो धनुषि आरोपितो
इषुर्येन।। यदैव भैमीगुणश्रवणं जातं तदैव तस्य मदनपीडा जातेत्यर्थः।।
वस्त्रलुल्यकालत्वद्योतनाय वा यैतिवा।। त्रो जनं दर्पं [illegible] कयदात्मत्रारासन
मितिवा।।४४।। अमुष्येतिवा।। स्मरः त्रयाणां लोकानां समाहारस्त्रीलो
की तस्या विजये नार्जितानि संपादितान्यपि यशांसि कीर्त्तिः संशये संदेहे
निमज्जयामास खलु।। स्मर [illegible] त्रैलोक्यजिते पियघ्नंजेतुं त्रा
क्रोति तर्हि एकस्या जयेन सर्वा [illegible] कीर्त्ति गमिष्यामीतिवा।। शक्रोमि
नु वेति संदेहः किंभूतः स्मरः तदा धीरस्या मुष्य नलस्य जयाय विशिखे
बाणे ज्यां सन्नाधयन् सन्नाधानं कुर्वन् स्पो जयन्निमित्यर्थः।। यतः साहसी।।
हिताहितमनपेक्ष्य तत्कर्म तत्साहसं।। तद्वान् अविमृश्यकारीत्यर्थः।।

।।२२।।

विशिखैरिति धीरस्यैकेन जेतुमशक्यत्वाद्बहुत्वं ॥ श्रेणीत्यपेक्षया ऽ
स्याति धीरत्वमुक्तं ॥ विजयोर्जितानामिति पाठः ॥ साध्वीयानर ॥ जयायै
तिभुमर्थादिति च लुप्यते ॥ निमज्जयामासेति जुः ॥ सकारस्य झलां ज
शाझशीति योदकारस्तस्य [illegible] निर्मितनिर्देशात्वा बहुत्वं ॥ ४५ ॥ अ
नेनेति ॥ अस्य नलस्य [illegible] तादृक् दुर्जयमपि धैर्यकंचुकं पौष्पैः
पुष्परूपैरपि अनंगमार्गणैः कामबाणैः यद्यस्माद्भेदि ॥ विदारितं ॥
तत्तस्मात् भाविक्षमाणं भैम्यभिलाषं प्रादि परिसाजनप्रकारेणानेन
नलेन भैमीघटपिष्यतः संगमपिष्यतो विधेः प्रलक्षणः अवंध्येच्छत
या अवंध्यास फला इच्छा मनोरथो यस्य तस्य भावस्तत्ता सफलेच्छत
याव्यलासि विलासितमिति । कविवितर्कः ॥ तत्तादृग अनंगमार्गणैरिसे
कं वा पदं पंचसंख्यतया प्रसिद्धैरल्पैस्तादृग्गिमिश्वाति मृदुलक्ष्णैः का
ममार्गणैरिति । अंगरहितस्योपि पुष्परूपैः बाणैः धैर्यकंचुकरूप
स्यापि मूर्त्तस्यापि वस्तुनो यद्विदारणं तद्विधेस्सफलेच्छता याएव विला
स इति यत्तदोः ॥ क्रियाविशेषणत्वं वा ॥ असंभावितमपि विधिस्स्वं
भवस्तेवेति भावः ॥ व्यलासीति भावेणिच् ॥ अत्तेदितिकर्मणि कर्मक
र्तरि वाणिच् ॥ पौष्पैर्भेदविवक्षायां संबन्धे ऽनस्वार्थे वा ॥ ४६ ॥ धैर्य
भंगमेवाह ॥ किमिति ॥ अस्य कामस्य अस्त्रैः बाणैस्तापितः पिताम
हो ऽद्यापि वारिजं कमलं आश्रयति ॥ अहो आश्चर्यं ॥ कश्चोपि ब्रह्मा का

मं स्वंतस्तः जातः यः स्वपिता महमपि अतिक्रम्य मपि पूज्यं च शस्त्रैः पीडय
ति॥ सोऽन्यं च पीडयतीति किं वाच्यं॥ स्वभावसिद्धकमलासनत्वं का
मं तत्र ते दृ॥ नोत्प्रेक्षितं॥ लुप्तोत्प्रेक्षा॥ सततप्राः शीतलं मा अयंते॥ अ
त एव वा द्विजपदं अन्यत्र कामस्य किं वर्णनीयं तत्राहं शंके॥ नलः आ
त्मनः स्वस्य तनुच्छायतया शरीरस्येनैव ० यद्वा जन्वीछायाशोभा
यस्य तस्य भावस्तया विरहव्यथाजनितम्लानशोभतया तं स्मरं लं
घयितुं न शशाक॥ यद्वाऽऽत्मनः सकाशात् कामस्य तनुच्छायतया ऽ
न्यशोभवेन जेतुं न शशाक। अपि तु शशाकेव॥ तस्मान्यकांति लं
आत्मनोधिककांतिमेव नलमद्वस्यर्थः॥ पूर्वं तस्याति शयितं पैर्य
वर्णयित्वा तत्र शशाकपक्षेन विप्रलंभयोग्यां लंघयितुं इच्छतिव शाकि

॥२३॥ योगेलुम्॥४७॥ उत्प्रेक्षा इति॥ सातन्विस्तत्र गीस्वस्यात्रपैव सरिन्नदी ॥२३॥

तस्याद् दुर्गं प्राकारमपि अपास। सत्ति देवदुर्गं वा प्रतीर्य तीर्त्वा नलस्य

यत् हृदयं प्रविवेश ॐ प्रविष्टा यद्वा नलस्यैव अपासरि दुर्गं [illegible] कुचा

कुंभयुगेन वक्षःस्थलं जेन प्राकारमपि अपास दिदेवदुर्गं वा प्र
तीर्य तीर्त्वा नलस्य हृदयं प्रविवेश प्रविष्टा। यद्वा नलस्यैव अपास
रि दुर्गं तत् उरो भुवा कुंभयुगेन वक्षःस्थलं जेन कुचकलशयुगे
न जं भिन्नं विलसितं किं उत्प्रेक्षायां गं किं भूतेन नवोपहारेण

नवो नूतनो उपसमीपगतो हारो मुक्ताहारो यस्य स नवोपहारः उपाय
न भूतेन वा ॥ वयसा यौवनेन हृतं वयस्यस्तं तेन भ्रांतेस्सकौ संप
न्नयौवनां तैमीं ध्यायते स्मर्थः ॥ अन्येपि कुंभकारस्तं उपढौकि
तं कुंभद्वयं वक्षसि निधाय तन्दुर्गां तीर्त्वा प्रियसंकेतं गच्छति ॥ उपा
यनमुपग्राह्यमुपहारस्तथोपदेस्मरः ॥ उरोभवेति भाषितपुंस्कत्वे
न न्नुमभावः ॥ कुंभयोनेतितिकर्तरि तृतीयायच्चेब्योप्यर्थः ॥ स्यात न्या
पि उरोभवा कुंभयुगेन अपासरिदुर्गमपि प्रतीर्य नलस्य हृदयमपि
विवेश ॥ किमिति वितर्कः ॥ इति वान्वयः ॥ किंभूतं दुर्गं जटं स्तितं असु
च्चमिसर्थः ॥ अन्यत्पूर्ववत् ॥ ४८ ॥ अपन्हुवानेति ॥ मनोभुवा का
मेन पद्धो इत्यर्थः ॥ अस्य नलस्य धृति निर्वाच्य उतं तन्निशा रात्रिः शय्या आ
स्तरणं वा बोधि जानाति स्म ॥ किंभूतस्यास्य नलस्य जनापलोकाय नि
जां स्वकीयां अधीरतां अधैर्यं अपन्हुवानस्य गोपयतः ॥ किंभूतानि शात्रा
ष्या चयंतो जागरदुःखसाक्षिणी जागरदुःखं साक्षादीक्षते विदुषीत्यर्थः ॥
त ज्ञागरस्येकं वा पदं ॥ शशांककोमला चंद्रेण मनोहरा ॰ ९चां द्विरात्रि र
तिदुःसहवा शशस्याम्पगाक्वित्रोषस्यांक उत्संगसद्भ ॰ म्हृद्धि चंद्रवन्म
नोहरा वा चंद्रेण कर्पूरस्य क्षेपेण मनोहरा वा ॰ चांद्रि रात्रि रतिदुःसहला
जागरदुःखसाक्षिणी शय्या चात्मनि विलुंठनेन रात्रिशय्या व्यतिरेके

णकेनचिद्विरहदुःखं न ज्ञातमिति भावः ॥ जानयेति श्लाघ्याद्भुडितिसंप्र
दानत्वं ॥ अबोधि इति दीपजनेति कर्तरि णिच् ॥ निद्रेति हलंताद्वेति दा
प् ॥ शय्येति संज्ञायां ॥ समजनीति क्यप् ॥ अगुडिसङ ॥ ४७ ॥ स्मरेति ॥
स्मरोपतप्तोपि भृशं अतिशयेन पीडितोपि स नलः विदर्भराजं विदर्भा
धिपं भीमं तनयां कन्यां नायाचत ॥ यतः प्रभुः समर्थो अभी भीमानी
ति यावत् ॥ कामपीडितः सन् कथं न याचितवानित्यत आह ॥ मानिनो
ऽभिमानिनः पुरुषाः शर्मसुखं असूंश्च प्राणानपि सजंति पुत तद्रूपं तेषां
वरं अल्पमिष्टं पकमद्वितीयं प्रधानमयाचितव्रतं अयाचनरूपं व्रतं
न सजंतीत्यर्थः ॥ एतद्वरं न विद्यते वरं श्रेष्ठं यस्मादिति श्रेष्ठमित्यर्थः ॥ पा
ठक्रमादर्थक्रमस्य बलीयस्त्वाच्छर्मपदस्य पूर्वमन्वयः ॥ यद्वा चकारस्त
ल्पकालद्योतनार्थः ॥ शर्मयथाभवति तथाऽसूनपि सजंति सुखं न सजं
तीत्यर्थः ॥ वरं श्रेष्ठमिति व्रतविशेषणं वा ॥ विदर्भराजेति राजाहरिति टच् ॥
यावद्दिकर्मकः ॥ देवाद्दृते वरं श्रेष्ठे त्रिषु क्लीबे मनाक्प्रिये इति समरः ॥ ५० ॥
स्मरेति ॥ अयं नलः क्वचित्कस्मिं [illegible] जि विषये स्मरेषामिष्याविषा
दात्तिनया तद्रस्ततमिति [illegible] स्वेदसंकटनात् ॥ वियोगभाजां
विरहजनितानि निश्वाससंततिं निश्वासपरंपरां त्रिगोपतिरोधते स्म ॥ तथा
विलेपनस्य चंद्रस्याधिकचंद्रभागताविभावनात् ॥ अधिकं चंद्रत्ता

गः कर्पूरांशो यस्मिन्नतस्य भावो स्तत्ता तस्या विजाननात्॥ तापभावप्रक
टीकरणात् वियोगजां पांडुरतां चापलं लोपं अथ चंदनमध्येऽपि कर्
पूरो जानन्ति तां गेऽपांडुत्वं न त्वन्यकारणमिति॥ विषमतीति विषा
दः त्रिवस्तस्याक्षिन यान्निश्वासो [illegible] त्रिवेत्रिवेति नामोच्चारणाद्
जुगोप॥ घनसारश्चंद्रसंज्ञः कर्पूरः इत्यमरः॥५१॥ शशांकेति॥ अयं
नलः अलीकविस्मिता मोहेन निश्चैव वा॥ वीक्षितां प्रियां भैमीं प्रति यत्किंचि
द्भाषे० तदश्येन दैवेन निन्होतुं गोपयितुं शशाक॥ वैणिकैर्वीणावाद
नकुशलैः पंचमरागस्य मूर्छनासु आलपीतासु पुनः पुनर्गीतासु स
तीषु समाज एव सत्तायामेव यत् मुमूर्छ तदपि तदपि अयेन रागमूर्छ
नाजनितसुखात्त्वाव पारवश्यव्याजेन निन्होतुं शशाक॥ मूर्छ
नालपिते सर्थः॥ क्रमात्स्वराणां सप्तानां प्ररोहश्चावरोहणं॥ सामू
र्छेत्युच्यते ग्रामस्थाएतेन सत च॥१॥ इति मूर्छालक्षणं॥ नाखेक विं
शानि॥ अथ च प्रियां प्रति० अये भैमी इति समाजेन त्रापितन्निन्हो
तुं न शशाकेति काकुः शशाकैव॥ शब्दांतरांतर्भूत [illegible] नमप
लपितुं॥ यद्वा वैणिकैः पंचममूर्छनासु गातुं प्रारब्धासु सतीषु स
माजएव सत्स्वेव मुमूर्छा येन लक्ष्यतं भैमी संबोधनं आकर्णनी
यं स समाज एव मूर्छां प्राप॥ यद्वा यत्किंचिद्भावेतद्येकामावनि

॥२५॥

न्होतुं न त्रा त्रा क समाजाय निन्होतुं त्रा त्रा क समाजाय निन्होतुं मपन्
न्होतुं न त्रा त्रा क समाजाय निन्होतुं त्रा त्रा क समा जाय निन्होतुं अपर्ण

पितुं समर्थो भूत् यतः समाज एव मूर्च्छकामायनायिका मर्थस्त्वस्मै
अये ॥ अपेक्षो थ विषादे च संभ्रमे स्मरणेपि च यी कामा पुरुषो क्तौ
चेति विश्वः ॥ अपः शुभावहो विधिः वीणावादस्य वेणीकाद्रस मरः ॥
रागप्रकटीकरणमालपितं पशुभ्ये रिक्तस्य मूर्हे वावा समाज रङ्गस्त्र
यम् ॥ वेणी केरि ति विशिल्प मतिद्र कू ॥ मूर्च्छा न्मादो उक्तः ॥५२॥ अवा
पेति ॥ सपूपतिः सापत्रपतां अवाप अन्यतोल ज्जापत्र पातुया सह
वर्त्तमानः सापत्रपस्तस्य भावः सापत्रपतां प्रापेत्यर्थः ॥ किंभूतो यतो
जितेंद्रियाणां मध्ये धुरि अग्रे प्रथमतः कीर्त्तितास्तां स्थितिर्मर्यादा
यस्य विरहव्यपालो केनापि ज्ञातेति सलज्जो भूदित्यर्थः ॥ कस्मिन् सं
तीनत्र समाजे सत्ता जमध्ये ऽसंवरे रोद्भुमशक्ये अगोप्ये ऽत्रांबर वैरी ॥२५॥
कामः तस्य वीक्रमे क्रमेण परिपाट्या स्फुटतां प्रागच्छमुपेयुषि प्राप्ते
सती ॥ असंवरेस्य यहहद्दता श्रीस पूग ॥५३॥ अलमिति ॥ अमी विवे
कप्रमुखाः विवेकादयो गुणाः नलं [illegible] पूर्वोक्तं चापलं रोद्धुं आवरीतुं
अलं समर्था नाभवन् ॥ नल [illegible] प [illegible] निवारयीतुं न शक्ता इत्यर्थः ॥
किल निश्चयेन यतः यतः प्रसिद्धः सस्मरं सामनुरागेसति ॥ पुरुषम
निरूप्रमेव चापलमेव सृजति करोति ॥ अयमेतादृक् सर्गनिसर्गः
स्थितिर्निर्णयः ॥ स्वभावो वा यमेव निश्च य इत्यर्थः ॥ अनुरागे सतीस

121

वौपि चंचलो स्ववती सर्पः॥ विवेकस्यापि किमपि न चलती सर्पः॥ यद्वा स्मरो रस्यां संजोगे अनिवारपितुमशक्यं चापलमिसर्पः॥ अ यमीदृशं कामेन स्वज्यमानस्य प्रस्तत्त्वी [illegible] पलस्य स्वत्ताव अथ च मदनः प्रद्युम्नाख्यः रसां आनन्द नामा [illegible] पुत्रं जनयतीति यद्व अयं द्वन्द्वः अनादिः सर्गस्य [illegible] व [illegible] ।पादेय चारो विवेकः॥ न लेमि तिषच्छा र्वे सस्मप वें चाद्विती या रुद्र क्रिं कमेकताल॥ स्वभावनि सर्गश्चैस्मरः॥ रोद्र मिति अलं योगे पर्यासवचने क्षितिर्तुमू॥ ५४॥ अनंगेति॥ सनलः यदा यस्मिन् समये विरहचिन्हापलापविषये पल वानपि सन् संसदि सभायामनंगचिन्हं पांडुरत्वं सत्यावं गोपत्तवल ना दिकामचिन्हं विना क्षणमपि आसितुं नो शशाक न समर्थो भूत्॥ तद्वा तस्मिन् समये आरामे उपवने विहारः क्रिडा तस्याः कैतवात् व्याजेन निर्जनं देशं उद्यानदेशं निषेविर्तु द्वेषद्वेषेत क्षणमुत्सवरूपं जि जनलाद्देशा विशेषणं वा यतदिति कर्णौ पर्वाद्दृष्टस्य सर्वदुस्समरः॥ चि न्हा॥ ५५॥ अथेति॥ अथानंतरं सनलः पानाय अभ्यमाने तुं निदेशा कारिणः स्वस्यान अदिन्देशा आज्ञापयामास॥ किं भूतः विरहव्यथा व्यापितोपि श्रीपाकांसा सुरूपत्वात् त्वद्दर्शितः तिरस्कृतः मरुक्लांतः नः कामोयेन विरहव्यथा गोपनार्थं अंगीकृतस्य त्रोजङ्घा दर्शित कामः जी तथा स्वरहस्य वेदिभिः स्वामिप्रा [illegible] हितैर्वयस्यैः स्वसखिभिः स

॥२६॥

मं सह पुरोपकंठोपवनं नगरनिकटस्थम् उद्यानं किलेप स्नीकमिक्षितो
ईक्षमाणः कामचिन्तापन्नवेताऽसर्यं ननु ॥ नवविलोकन इति किलेसः तौ॥
उपकंठ सामीप्य अव्ययीभावः ॥ वनाय ० तित्रियो भोपपदस्योतच्चतुर्थी
॥५६॥ अमीति ॥ ततस्तदनंतरं अमी तस्याः तस्य नलस्य अश्वं उपाहरन् आ
निन्युः ॥ अश्वविशेषणानि ॥ सितं श्वेतं विभूषितं विशेषेण अलंकृतं जवेपि
वेगेपि पौरुषेण बले नाधिकं मानेपि पौरुषं पुरुषपरिमाणपरिमाणेपि तस्मा
दधिकं अजस्रं चंचलैः असंतं चंचलैः खुरैः चलैः खुराग्रैः प्रयोज्यैः क्षो
भितं चूर्णिकारितं मंदुरायाः वाजिशालायाः उदरं मध्यं येन खुरैः खनन्यः
पि व्यावाम न्योलोको नरः स्पष्ट इति शालिसेरो विभूषितं विनापक्षिणा
पि व्योमगामिनं इति वा ॥ सितमिस
ऋविस्थाने उषितं वेगवशात् आक्रमणाद्याग गनगामिनं इति वा ॥ सितमिस
ने वरेफ प्रसृतितं तेनातिबलबलं सति कुलादि सलक्षणे सूचितं ० ऊर्ध्व
मिस्स्त प्रदो पाणि न्मात्रै नेपौरुषं त्रिषु वाजीशालानुमंदरस्समरः ॥ पुरु
षशब्दात् पक्षे भावे पु वादित्वादण् ॥ परिमाणे तु पुरुष हस्तिभ्यामाणेस
ण ॥ क्षौदितिमति हेतुमण्यंता निष्ठा कर्त्तरी चट्तौ पाकरणे वा ॥५७॥
अचेति ॥ अथानंतरं सनरे .... यमारूढे हति स समश्लोकेनान्वयः ॥ अश्व
विशेषणानि ॥ किंभूतं ॥ स्कंधं न रूढ केसराः केशाः केसर केशा न्तेषां रा
जिमस्ति तल्लक्षणे रेखकी रणोर्णा विराजितं शोभितं ॥ किंभूतैः निगाल्ग
लप्रदेशात् वर्त्तमाना लक्षणे ० तां देवमणे देवमणि नाम्नो दक्षिणा
वर्ता न अवटुगामिना आंतरेणा मध्यवर्त्तिना ऽध्वना मार्गेण हृतीते

॥२६॥

निस्तै खिन्नयाउज्ज्वलगान्नि[illegible]नीराचिस्तस्यानाथश्चंद्रः त
स्य महांसि किरणाः तेषां सहोदरे सदृशौ प्रायेण सहोदरा सरूपा
भवंतीति सारूप्यं लक्ष्यते॥ [illegible]द्रमणीः कौस्तुभश्च अथवा स
मुद्रादुत्पन्नत्वादुभयोः सहोदरत्वं केचि[illegible]म[illegible]रूपलक्षितं विराजि
तं॥ वीनां पक्षिणां राजा विरा[illegible]रुडस्तद्वदाचरितं० निगाल गोरुग
लोद्देशो अमरः॥ अथवा भूषाहस्रकाटिके समरः॥ देवमणिः[illegible]तेऽश्व
स्य कंठोवर्त्ती च कौस्तुभ इति विश्वः॥ सहोदरे इति चोपसर्जनस्येति
वैकल्पिकत्वात्सादेशाभावः॥ ५८॥ अजस्रेति॥ रेणुभिश्चरणेषु उ
पास्यमानं सेव्यमानं। किंभूतैः रेणुभिः अजस्रं निरंतरं भूमितटकु
ट्टनं धरातलचूर्णनं तेनोच्छ्रितैः कैरिव॥ अणिमा अणिपरमाणुत्वं ते
नांकितैर्युक्तैर्जनस्य लोकस्य चेतोभिरिव अंतःकरणैरिव अणुपरि
माणं मन इति॥ किंभूतैः चेतोभिः स्वप्रकर्षस्य वेगातिशयस्याध्या
पनार्थं पठनार्थमागतैरिव स्फुलेक्षा॥ मनसोपि सकाशाद्दश्वस्य
वेगातिशयो घोष्यते॥ अथवा शिष्यगुरुचरणयोरुपास्ते॥ अजस्रं
भूमीतटकुट्टनमुत्तमाश्वजातिः। भूमीति स्त्रीकारादिति दीप॥
अणिमादिमजितत्॥ ५७॥ चलेति॥ चला चलो अतिचंचलः प्रो
थः घोणाग्रं नासापुटं यस्य तस्य तावत्तता० तया महीभृतेनला
य स्वकीयवेगे विषये दर्पान्वेगान्वक्तुं असिधालुमुत्सुकमिव

उत्कंठितमिव तर्हि किमिति नोत्कूजानिसाह॥ किल प्रसिद्धौ ऽयं नलो नृपस्य
स्वरूपस्वमस्तिप्रापं आमनैव वेदतो। नाति॥ किल अतोगिरावाचा अनं
पूर्यतामिति हेतोरिव मौनमास्थितं० चूलाचलप्रोपवमस्थजातिः॥ द्वाकु
रग्रे स्वयं स्वगुणं वक्तुं अनुचितमित्यर्थः॥ चलाचलेति चरि चलयति च
दीनां द्विर्वचनं॥ अचक्ष्यासस्य द्विलगागमश्च० अत्यासकार्यमनवी
तिवक्तव्या। दार्गामी दीर्घलीयर्थी द्वाहलादि शेषेन महीप्रतेक्रियाधाप
मनिप्रेतीति संप्रदानत्वं॥ गिरेतिवारणार्थे योजेत्तृतीया० वेदेतिवेदोत्ला
वेदेवेतित्वालू॥२०॥ माहारयस्येति॥ माहारभस्य अद्भुतयोद्विनश्चक्र
वर्तिनः सार्वभौमस्य नलस्या ध्वनिमार्गे आकाशगामित्वेन विद्यते॥
अध्वनिपत्राक्रियपिमति॥ परेषामन्येषामश्वानामनपेक्ष्यापाऽमाश्रये ॥२७॥
॥२७॥ ताय दुद्धहनं तस्मात्ज्ञातं यद्यशः तेन यत्रासासितं श्वेतं अत एव रक्षानां दंता
नां अवदाता निर्मलाः ये अंशवः कीरणास्तेषां मिषात् अनीशांपरानपे
क्षोद्वहनासमर्थानां रवेः सूर्यस्य अर्वतां अश्वानां बलं अंतर्मुखमध्ये ह
हसंतं सूर्याश्वापरापेक्षोद्वहनानाहंत भेसूपत्रासत्तेषांपवापराणां अ
पेक्षोद्वहनात् सूर्याश्वानां बलं दंतोज्वलकिरणाव्याजादंतर्हसंतं मिस
न्वयः॥ स्वतानिकं स्वतनुहेपवशोहेतु त्वेन नलो प्रेक्षितं॥ सूर्याश्वानां
नीलवर्णत्वात्॥२१॥ सितेति॥ सि[illegible]चेतां [illegible] दीप्तिर्यस्य तस्य चंच
लतां चापल्यं उपेक्षुषः प्राप्तस्य पुरुषस्य चक्रे स्वरस्य च स्कंधके शासमू
हस्य मिषेण व्याजेन चलं चंचलं [illegible] मरत्युगंतस्पचिक्कनेः स्थानिज

125

वाजिराजतां वाजिनां राजा इति वाजिराजः तस्य भावस्तत्ता निजस्यात्मनः
वाजिराजतां अपन्हुवानं मंदस्यंतमिति स्फुटं उत्प्रेक्षा राजाहि स्वेन चा
मरद्वये न वाजिवलनक्रियापेक्षया चिन्हने स्थितिबहुलवचनं ॥ चि
न्हनैरिति तत्करोतीति णायंतप्रत्ययेतुल्येतिल्युट् ॥ ६२ ॥ अपीति ॥ रम
स्मये वेगगर्वे प्रसक्तं बलात् इति तस्य गरुत्मतो गरुडस्यापि द्विजिव्हाः सर्पा
स्तेषां अभ्यवहारो भक्षणं तस्मात् यत्पौरुषं तस्मिन्नपि मुखे वेनुषक्ताले
ग्ना आयता दीर्घा वल्गुः सुंदरी या वल्गा प्रग्रहः तया छलात् प्रतिमल्लतां प्र
तिभटतां उपेयिवांसं प्राप्तवंतं वल्गाग्रांता हि सर्पपुच्छसदृशा दृश्यंते ॥
पूर्वं वेगदर्पविषये जो धुना सर्पभक्षणपौरुषेपि वल्गाकान्यकुर्वो
भाषायां वाग इति प्रसिद्धा ॥ ६३ ॥ स इति ॥ सिंधुजं सिंधुदेशोद्भवं शीत
महर्घं प्रशस्तस्य सहोदरं तुल्यं उच्चैःश्रवसः इंद्राश्वस्य श्रियं शोभां हरंतं
तसहस्रां • किंभूतो नलः जिताः अखिलाः समस्ताः क्ष्माभृतो राजानो
येन जिताखिलक्ष्माभृत् तं जेता अनल्पे महती लोचने यस्य यद्वा अन
ल्पं लोचनं ज्ञानं यस्य तथाक्षितोपध्यिव्यां पाकशासनं इंद्रं अद्वक्षि
तोपाकं पचि क्रियां शास्ति उपदिशतीति ॥ सूपशास्त्रप्रणेतृत्वात् ॥ उच्चैःश्र
वा अपि समुद्रजः चंद्रभ्राता तं यथा जितसमस्तशैलः सहस्रलोच
नः इंद्र आरोहति तथा तं हयं मा रुरोह ॥ ति ॥ सिंधुजमिसमेनाश्वत्रा
त्वोकं चलुः पंचाशदुत्तमकुलमध्यमजवं ॥ बलिष्ठमहाकायसूचि
तं ॥ दे॰ शोनद विशेषेभ्यो सिंधुर्नीसहितः स्त्रियां ॥ कुलंरो धश्चतीक्ष्ण

प्रतिरंच तत्टं त्रिषु॥५४॥ निजाइति॥ अश्ववाराः अश्वसादिनः तं मनुजे
जेशं राजानं नलं अन्वयैयुः॥ अनुजग्मुः किंभूता अश्ववारा निजा स्वकी
या किंभूतं नलं स्फुटं प्रकटं लक्षणभूतानि रेखाभूतानि यानि अरविंदा
नि तैरंकितं चिह्नितं पाणिपंकजं यस्य तं तथा जवनो वेगवान्यो ऽश्वः तेन
यातीति एवंशीलं केकमिव ० निजा मयुखाः कीरणाः तिक्ष्णदीधिति सू
र्यमिव॥ सूर्य विशेषणमेव स्फुटं कमलपा दिः सूर्य इत्यागमः॥ सूर्येऽपि
जवनैरश्वैर्यातिमयुखा यथा सदा सूर्यचारिणः तथा अश्ववारा अपि तेन ते
षां स्वरहस्यवेदित्वं० जगमं च जवाधिक इत्यमरः॥ प्रकाशेति प्रसिद्धेस्या
प्रकाशतपयो स्फुटदृति विश्वः॥ मानाति हिनस्ति तम इति॥ मयूखः मा
नाते रूख इत्यादि कू उरव प्रसयः॥ अश्वान्वरण्वतइति अश्ववाराः क ॥२८॥
॥२८॥ र्मण्यण्॥ न्वचंद्रमेति पुजवनः॥६५॥ चलन्निति॥ नगरालयैः नगरमा
लयैः स्थानं येषां तैः नगरवासिभिः लोकैः जलोध्य लोकी स्वेच्छया दृष्टः॥
किंभूतः महारयं अतिशयितवेगं हयमश्वं स्वाधिष्ठानेनालंकृत्य चत्वरमध्ये
मार्गं गच्छन् ० पुनः किंभूतः स्वस्य वाहो अश्वस्तस्य क्षणो वाहो वाहनं तस्य उचि
तो वेशो लंकारादिस्तेन पेशलो रमणीयः यद्वा वाहवाहस्य अश्ववारस्य यद्वा
वाहस्य अश्ववाहो संचारणे उचितो वेशो नेपथ्यं ० किंभूतैः जनैः प्रमोदेन
अतिशयितानंदेन निःस्पंदतराणि निश्चलानि अक्षिपक्ष्माणि नेत्रप
क्ष्माणि येषां निर्निमेषं सादरावलोकनं कुर्वद्भिरित्यर्थः॥ महारयत्वेन अ
श्वानिर्मीशाभिः धनुःशतमात्रमूलं घनसामर्थ्यं च सूचितं॥ वाहस्तमीन

भेदैव्यषेहपद्मसमर:॥पिशान: सुंदरीदश: इति च निःस्यंदेति पाठ:॥
नगा: संतिमक्षिन्निलितिनगरं॥उपसुभिसंत्रनगपांडिसाद्भिवचनात्॥
॥६६॥क्षणादिति॥अथानंतरं पृथ: नल: वाजिना अश्वेनाभि: जनदृ
ष्टिवृष्टिभि: सहैव लक्षणात्॥निमेषमात्रेण पुरान्नगरात् बहिरभू
त्॥क्षणादारात्रि: तस्या: पतिश्चंद्रस्तद्वत् भा यस्य तथा पुरुहूतद्रुमस्त
द्वत्सौरूपं सामर्थ्यं यस्य॰ अपरिवर्हि इति पंचमीसमासविधानादेव द्वा
पकाद्धर्द्धियोगे पंचमी॥६७॥ततइति॥ततः पुरनिर्गमनानंतरं आसीर्
सेनामुखं गते सारे नलस्य सादि बले अश्वारोहसैन्ये कूतुहलं तस्मात्को
तुकात् कोदत एवम् एषा अलीकम् युद्धं विनिर्मलु:॥[illegible] च क्रतु: किंभूते हे
शूर त्वं प्रतीक्ष मदीयं शस्त्रं स्वांगे गृहाण प्रहरमपि प्रहारं कुरु इती ला
षणी वदती तथा परस्परस्य उल्लसिता उद्भिर्णी नतुक्षिसा शान्याना
रा स्त्राणां पल्लवा प्रांता यासु तं अत एवम् एषा पल्लेन प्रांता वाची व स्त्र
पल्लवयत्॰ नलस्य कुतूहलं हेदितिवा॰ शल्यंतो मर शास्त्रं सेनामुखं
तु नासीरङ्क समर:॥परस्परेस्सरकस्मादिन्वासाधु:॥६८॥प्रयातुमिति॥
भीजे नस्वकीये नवेगेन प्रयोजके न दर्पितै: गर्वं प्रापितै: वाहैरश्वैरितीयम
नसी ध्वाहैतो वा रजउद्धूतं उच्छापितं इति किं इयं धरा पृथ्वी गच्छतां धावतां अ
स्माकं अश्वानां किपत्तदस्यादपि तद्वित्रिणी पदानि भविष्यति यस्माद् अत ए
व प्रयातुं प्रकर्षेण यातुं गंतुं मंतोनिधिरपि समुद्रोपि स्थलायतां स्थलं मिव
आचरितु तत्त्वित् किं भूतं रज: पयोधे: समुद्रस्य रोध: पूरणं तत्र क्षमं समर्थं

प्रयामिसस्य स्खलनापतांइत्सनेन संबंध्यः दर्पितैरिति तायं नानिष्ठा॰ अन्य
थास्यक्षेणस्य हप्यतइ इतिस्यात॰ राष्ट्रीकरणस्य नु दर्पितु इति ॥ ६८ ॥ हरे
रिति ॥ याचार्यतेतोर्वान् श्रीतानने इतितेतोर्वान श्रीतानने नैजितं नस्त्री
स्तं आननं मुखं येरर्जुनेनसि अंतरिक्षे स्तः क्रमः ॥ पादविक्षेपो येत्
तैरन्यैर्नवत्तरिपराव्वतं ॥ अर्जुनेन सखीतिवाइतीति किंयत्नेन भः हरेः वि
द्धोरेककेन असाहायेन पुष्टा चरणेन आक्रामि आक्रांतं तस्य खस्यन
भसश्चकुर्षिरिव पदे चरणेः क्रमणे नोस्माकं हरीणामश्वानां अथच
विष्णूनां बहूनां अस्माकं अपालआत्त विष्पतीति न सजातीयेन एकेन ह
रिणा एकैनैव पदाक्रांतं नभः बहुभिरेव पदैराक्रमणे नैव नोस्माकं अती
वलज्जा कपंनस्यादिति शब्दछले नलुप्तोपेक्षा ॥ सलज्जश्च नमुखो
भवतिइति ॥ अर्जुनेन भस्तः क्रमैरित्यनेन गतरूतमवंसूचितं ॥ तेन ॥ २९ ॥
सादिन आनंदानोपदेशास्य मांतस्याभाचमेरिति वृद्धि निषेधादका
मितिचिस्यं ॥ सस्य वृद्धम वृद्धं भवतीह्यि वृद्धं स्तु वृद्धं भवतीतित दावचन
ज्ञापितयापवि भाषयावृद्धिनिषेधस्यानित्यत्वमाश्रित्य कथंचित्परि
हरणीयं ॥ यदातु नदोबाचे स्वरार्थमादेशप्रसंग इतिपक्षे स्तदेत
स्याः परिभाषानिर्मूलत्वाच्चिमेन॰ यदाप्राप्तिर्...तयमोवि सक्तिवान्न
विक्ता विसने नैव मकारस्येह ... ...स्य मुसियुकारो
च्चारणं व्यर्थं ॥ संदेतस्याः परिभाषायामूलं ... ...संतरैवाग
वेषणीयं ॥ मदेति मदत्रिप्तिपादेः ... ...कादिकर्मिचेतिस्यकाद

५२५॥

कृत्र॥८०॥चश्चेति॥तस्यान्यपरस्या [illegible] नरा: [illegible] ऽश्ववारास्तपूर्वोक्तंबा
ह्यदेशांबाह्यालिंदेशांश्चवाप्या [illegible] गमानपिबहुमश्चानपिमं
डलीमंडलाकारेणगतिविशेषं [illegible] रयन्ति॥अपिचाश्वोमंडलीक
रणयत्नात्तस्यमविस्तृतवर्त्त: [illegible] नाटिकेषु [illegible] यवचनेषुश्रा
द्धतपारास्तिकतया सैंधवाइवसिंधुदेशोद [illegible] जिनाइवविहारदेशं
सुगतालयंप्राप्यमंडलाव [illegible] रेणावतिष्ठन्ते [illegible] येसर्प:॥तेषामपसंप्र
दाय:तंडुलादिसप्तधान्यमपिमंडलीकारयंति॥तत्संप्रदायविद:चत्व
चरइतिचरेष्ठ:श्राद्धइतिमतयेप्रातइतिन:मंडलीमीतिगोरादिवा
त्कीप्॥कुरंगमान्हस्कोरितिकर्मकर्त्तृ॥८१॥द्विषड्भिरिति॥तुरंग
मैरश्वैरितिहेतोरितिविचार्यवी०धारामास्कंदितादिपंचप्रकारांगतिमधिर्य
सक्काऽवशीयमंडलीक्रियाश्रियामंडलीकारजनितशोभयास्थलीअस्त्री
माभूमीअमंडिअभूषि॥अश्ववाराधारास्ति:प्रथममश्वान्भ्रामयंति॥
पश्चाद्भूमिगतेतितेषांजाति:॥इतीतिकिं॥अस्पद्विषड्भिरेवदिशो [illegible] ये न
विलंघिता:आक्रांता:अस्यपत्रोपिरेवकीर्त्तिरेव [illegible]:समुद्रोगो
ष्पदं गोखुरप्रमाणोऽनायासेनलंघ्य:एवंविधोअकारीद्धत:॥तुरंगसा
स्मादिभि:दिग्गागतोसमुद्रश्चलंघनीया:तयोर्धुनमन्येरेव [illegible] इति त
त्रैवयमिंच [illegible] र्धं॥आस्कंदितंधौरितकरेचितंवल्गितंप्लुतंगतयो
भू:पंचधाराइ [illegible] समर:॥गोष्पदमिति गदं सेवितासेवितप्रमाणेऽ तिप्रमाणे

से

न्पुद॥ षष्ठो ध्यारामितिष्ठीर्यं॥ तेगतौ स्थाप्यते ऽनयेतिध्यारामित्यदिवाद
दु॥ आनाकवचनं॥ लस्खलीति अस्खलितमव जानपदेति ङीप्॥ अवधीर्ये
ति अवधीर्यकाच ज्ञानामिति धातोरूपं नीतस्यल्पवादेग्रासंभावान्॥
किंतु अवाधिपूर्वस्य हारनेरणइस्सस्य॰ अबाप्यिस्यन्नरांकं धादित्वात्
पररूपत्वं ततत्रश्चं तैं अवधीर्येतिसिद्धं॥७२॥ अर्चीकरदिति प्रज्वलः नि
जातपत्रस्यस्वकीयछत्रस्यनलस्खलेयो भागेहपेनाभ्वेनच्चारुसम्प
क्कमनोज्ञाया त्रमीः अमणानि अर्चीकरत्तकारयामास॥ तासुविषये
मरुत्ता पुरघापिवासामयावातसमूहरूपाश्चक्राकाराश्चक्रमास्तत्र
मणानितान् रविष्ठतस किं नसिक्षते॰ भूमिविषयेज्ञानेत्राक्तोभविलुंने
छति किं अपितु॰ त्राक्तो भविलुं इच्छसेव॰ परमद्यापित्राक्तोनाभूदिस
॥३०॥ र्थः॥ बासावर्त्तं कुर्वन्नवापुरपि स्वमि ज्ञानेत्राक्तोभविकुमिच्छतीवेस्क ॥३०॥
त्रेक्षा॥ एतेनाग्येस्य चलनक्रियाशक्तिस्सवत्वं चोक्तं॰ सहरहितोन
संख्याद्य इति सज्ञलक्षणगुणे: लाध्य:॥ किं सहं विनाहय: पूर्वेद्वि पस
माभिपियथाकालोनिवाम्नोतिर [illegible] सिं गौहयेनेतिहक्कोरितिविक
ल्पितत्वान्न कर्मवान्नाव:॥ त्रमीरि [illegible] दिवादिकू॥ त्रिक्षात इतिसनं
ताघ्रके: त्रिक्षेर्जिनासायामि सेयत्तस्यातं [illegible] क्रमातिपड्नाध्वजि
अतोलोपस्य हल इतियलोप:॥ चितस्यविशेषत [illegible] समानकोलोक्तौ॥
पात्रादिवा ग्रास्तातनस्तकुपेमयद्॥ ता छवित्राश नद्दति [illegible] ताः त्रमीः सु

शोभं किंन शिक्षते जिज्ञासते ॥ [illegible] विलेशोति ॥ ततो [illegible] क्षोणि
पतिः पृथ्वीपतिः नलः प्रवालरागेण नवपल्लवलोहितेन [illegible] वालो वल्ल
वी दंडे विद्रुमे नवपल्लवे इति [illegible] वः ॥ निविडं [illegible] निविडछायं वि
लासकाननं क्रीडावनं गत्वा प्राप [illegible] तीव्रतापाप्तिसाभि
लाषेण ऽत्र मम संतापो निवर्त्स्यति [illegible] योगात् [illegible] व्यासंगात्
धैर्यं भवेदिति वा० सनयावाविवेकः कयाकामिव ॥ हरिः विष्णुः स्तुष्णु
स्य यास्वपितुमिच्छया प्रवालरागेण विद्रुमलोहित्येन वक्षुरितं रामलात्
घनस्पर्शापेवच्छायापस्य एवं भूतं [illegible] सांनिध्ये समुद्रमिव [illegible] च
पल्लवाः तेषां रागः तेन ताम्रं जलस्थानभूतं निविडछायं वनं स्तुष्णु स्य पा
हरिः सिंहः यथा विशति तथैव सर्वः ॥ क्षोणीपतिरिति द्रुमो हस्वः ॥ [illegible]
स्वांतएव वा दीर्घांतस्तत्र दिकारादक्तिन इति [illegible] तात् ० लो वल्लकी
वने ॥ ७४ ॥ वनेति ॥ पुरौकसां नगरौकसां दृष्टिप्रकरैः नेत्रसमूहैः नला
वलोकनार्थं सस्पृहं साभिलाषं वनांतस्य वनस्वरूपस्य पर्यंतं मर्यादामु
पेस गत्वान्यवर्त्ति निवर्त्तं ॥ कस्मिन्सतीत स्मिन्नले क्रमेणावतीर्णदृष्टिपथे
नेत्रागोचरे सति ० किंभूतैः दृष्टिप्रकरैः अनुगजनैः अनुगच्छन्नयोबं
धुजनः दृष्टिसमूहः तस्य बंधुभिः सदृशैः वनांतः पर्यंतोऽवधिर्यथा सव
ति तथा गत्वेति क्रियाविशेषणं वा बंधुभिरपि वनांतं उदक समीपं क्रीडाव
न समीपं वा साभिलाषं गत्वा तत्रैव स्थित्वा पथिकेऽदृष्टे सति निवर्तंते ॥

जीवनं भुवनं वनमित्यमरः ॥ दकुमपथ इति ॥ ऋक्पूरित्यात समासः ॥ ७५ ॥ ततइति ॥
ततोवनप्रवेशानानंतरं सजनाधिपो नलः काननस्य क्रीडावनस्य कामनीय
कं मौरोणियकं व्यलोकयत् प्रत्यपतिस्म ॥ किंभूतं वनपालस्योद्यानरक्षकस्य पा
णिनाहैस्तेन निवेद्यमानं ज्ञाप्यमानं किंभूतेन ॰ मं जुले रमणीये प्रसूने पुष्पे
फले च जाता वेकवचनं ॥ सन्मुखस्थाऽपि मुखा अंगुलिर्यस्य कामनीयक
मितिभावे यो पाधिति वुञ् ॥ गुणवाचित्वात् पूरण गुणेति षष्ठ्या समासे निषे
धेपि संज्ञाप्रमाणत्वादिति ज्ञापकबला समासः ॥ ७६ ॥ फलानीति ॥ वनेवि
द्यमानैः शाखिभिः वृक्षैः महर्षिवार्द्धकात् वृद्धमहर्षिसमूहात् दातिथ्यं त
स्य नलस्य पूजा अतिक्षितवा ॰ किंभूतैः शाखिभिः वयोतिपातेन पक्षिपातेन
उद्भूतः उच्छ्रितो यो वायुस्तेन वेपिते कंपिते पल्लवे रेखाग्रलक्षण एव करे ह
स्ते पुष्पाणि च फलानि च समादाय गृहीष्या स्थितैः वृद्धमहर्षिसंघोपि वृद्धत्वादे ॥ ३१ ॥
वचं चलहस्ते फलानि पुष्पाणि च गृहीत्वा राजपूजार्थं पथाति स्थितितथा वृक्षा
अपि उद्यानेमहर्षयतीष्ठंतीति सूचितं ॥ विद्यमानैर्विद्यास्यासच्च फल पुष्प
युक्ता वृक्षा तिष्ठंतीति भावः ॥ वृद्धानां समूहो वार्द्धकं ॰ गोत्रादिसूत्रे वृद्धाच्चे
ति वक्तव्यात् अञ् ॥ महर्षिणां वार्द्धकं इति षष्ठिसमासः ॰ समर्थ्यादृद्धसंतर्गत
स्यापि वृद्धशब्दस्य पथाकार्यं कथं चिन्महर्षि[illegible]अपः महर्षिपक्षे वयस
स्तारुण्पाख्यातोपयोग इति अपादानत्वं ॥ [illegible] ताप इति
ण्यः ॥ शाखिनः अस्मर्थेति त्रिहादिनिः [illegible] लाहिक त्वावो
मतेः कंटकितत्वात् प्रथमं केतकं वर्णयति ॥ [illegible] लस्त्रवनेको

॥ ३१ ॥

लुकी अपूर्वपुष्पादिदर्शने लोलः विरही वास [illegible] मंददर्शी ॥ किं
मृतं केतकं ॰ विनी प्राविकसितापत्रालि [illegible] तायेऽ
लयो भ्रमराते षां केतवाभिषा ॰ मृगांक [illegible] स्त्रियस्तेन
वर्जनं पुराण प्रसिद्धः परित्यागस्तेयार्जितं [illegible] दिनाभ्रु चरिस्सु प्रसर
णशीलं दुर्यशोऽपकीर्तिस्तां दध्यानं ॰ एतेभ्रमरा न भवंति किंतु माहादेवस्य
त परित्यागजन्यमयशाद्रूति महतापीस्सक्तोऽपशाभाकू भवति चरिस्सुः अ
लंदस्सादीनाइक्षु च्यू ॥ कौतुकी अत इति । केतक्याः पुष्पं केतकं विकाशेनप
वप्रसपस्प पुष्पमूलेषु बहुलमिति न च [illegible] लुकृ ॥ ७८ ॥ वियोगेति ॥ तेनन
लेनेतिस्स ध्याक्रोधेन केतकमास्पृष्पत ॥ अनिं घतेतित्ततीय श्लोक गते
नान्वयः ॥ इतीति किं ॰ स्मरेण कामेन वियोगभाजां वियोगिनां स्त्री पुंसां
हृस्विक्षसि कंटकैः कटुः क्रूरः कर्णिकारः कर्तायुक्तो बाताह्लंपघस्मानि
धीयसे निक्षिप्यसे तत्तस्मात्कारणात् कर्णिकारस्त्वाद्धा हृदयबाद्धा दुराकर्षित
या उग्रर्तुम शक्यतया तदंतस्त्वं ॰ वियोगिनां प्राणहारित्वं मम न यदेह दा
हिनास्मरेरा माहेदेवेन विगीयसे ॥ निं घसे ॰ येन वियोगिनो हतास्मदा
दयप वेतस्त्रेत्रयः संकेतकमिति निंघसे ॰ लुप्तोल्लेक्षा ॥ ७७ ॥ वक्ष्येति ॥
मनोभवः कामः तेवाग्रमिव सूक्ष्मत्वात्तीक्ष्णताग्रसूचीत द्रूपेण सूचीवे
नोपकारकेण स हायेन सहता कामिनोः स्त्रीपुंसोः परस्परधैर्यभंगो दु
र्यशालक्षणो पटो सीव्यतीयपति ॥ यो जयति सप्रथमकलिकया भतिस्सु

५२॥

रक्षितवाँथ्याऽद्दीपनत्वा॰थहेतुभूतया कौमीनो ऽप्युचितानुचितसंबंधम
प्पविचार्य मिथोस्थितंस्रू प्रवर्त्ते इति भाव:॥स्फुरत्युत्प्रेक्ष्यते॥सकाम:वि
योगिनां तस्मिन् हृदेव दारुकाष्ठंकरपत्रवत् क्रकचवत् मूर्त्ति:स्वरू
पं येषां तै: नवपत्रै: स्वर्ग्गा दारुणायते भीषणवदाचरति॥केतकाग्रद
र्शनाद्वियोगिनो: स्त्रिपुंसो: धैर्यभंग:पत्रदर्शनाद्धृदयंविकीर्णत्तय
तीति भाव:॥दारुणायस इति पाठेस्त्रमिति ज्ञातव्यं॥स्रूयाति पाठान्तरं॥पू॥
कामीनोवियोगी स्त्रपुमान्स्त्री स्त्रत्येकशेष:॥८०॥धनुरिति॥प्रसू
नधन्वा काम:नवपरागै: धूलिभि: धूलिहस्तयन्॥धूलियुक्तंहस्तंकु
र्वन् सन् भीमजापरं भैम्यनुरक्तं मां शरसाद्वाणसाधीनं करोति

३२॥

बाणलक्ष्यं करोति किंभूत:काम:धनु:पुष्पं तस्य मधुनारसेनखि
न:आर्द्र:करोयस्य इति केतकमनिंदम॥तवधूलिपदिनस्यात्तदाका
म:स्विन्नकरत्वाच्युतस्यापकं:स्यात्॰पतीयमपरत्वस्तत्वैवस्विन्नकरो
धनुर्धरो धूलियुक्तंहस्तंकरोतीति जाति:धूलियुक्तंहस्तं करोतीति
ण्यं ताक्षनां॰प्रसूधन्वेति धनुषश्चैमन दृ॰शरसादिति तदधीनजाति:
॥८१॥विदर्भेति॥सबल:दाडीम... मेदाडिमीवृ... ...वृक्षे फलानि अप
त्रपत्॥किंभूते दोहदधूपी नि अतिशयि... ...ताधूर्येन भवति
तद्दोहदं दाडिमी वृक्षस्य चदोहदधूप: सदोह... ...तामिन् का
निवघटानिव विदर्भसुभ्रू भैमीतस्यास्ता... ...च...स्या:आ

कं

समये प्राप्तसमये अलंमतीत्यनेन तपस्यतः तपः [illegible] एव धूमस्य धयानः अतएव अग्रधो मुखवान् यो पु[illegible] उरवा धू मपानादिकं करोति दाडिमफलानीव [illegible] [illegible] ॥ तपस्य तः कर्मणो रोमन्थेत्यादिना । क्यङ् ॥ तपसः पर[illegible] तेवैक्तव्याख्यात ॥ धयानः पाघ्राध्मादिसूत्रेण शः तत्रापि सर्गानुवृ[illegible] तनी वत्तयकीति वत्तापुक्तं ॥ दोहदधूपिनीति कर्मधारयादिभिः समर्थनीयः ॥ ८२ ॥ वियोगिनीति ॥ अस्मीन लः दाडिमीक्षेत्रे क्षतं अपरपतत् । किंभूतां वियोगिनीं ॥ विभिः पक्षिभिः शुकादिभिः योगोयस्याः सा० अथच वियोगिनीं विरहिणीं नायिकामिवेति लुप्तोत्प्रेक्षा ॥ प्रियस्मृते दोहदादिस्मरणात् लक्षणया प्राप्ते हेतोः स्पष्टं प्रकटमुद्गतकंटकोः प्रियस्मरणाद्रोमांचितांगी नायिकापि नायकस्मरणात् द्रोमांचितांगी भवति ॥ तथा फलानि स्तनानिव तेषां स्थानेमध्ये विदीर्णे स्फुटितं रागी पक्ववाल्लोहितं सयुक्तं हृत् आंतरप्रदेशस्तस्मिन् विशंति यानि शुकास्यानि शुकमुखानि तान्येव स्मरस्य किंशुकानि पलाशपुष्पाण्येव अशुगाः बाणा यस्याः नायकापक्षे ॥ दाडिमीफलतुल्य स्तनमध्ये विरहित्वात् स्फुटितमनुरागयुक्तं पतत् हृदयं यस्मिन् विशंतः शुकास्यतुल्या मदनेकिंशुकबाणा यस्याः दाडिमीफलं स्वयमेव विदीर्यते ॥ अथच फलस्य परमात्मसाक्षात्कारलक्षणस्य स्तनं कथनं बोधकमितियावत् ॥ एवंभूतं यत् स्तन्यं तुरीयावस्थालक्षणं तस्माद्विदीर्णं च्युतं

दुर्यावस्थामप्राप्तं एवं भूतं पूर्वं विषये पुरा गिरिशान्नुरागं प्रमद् हृदयंत अविश्रांतः
शुकाः लक्षणयात दुपदेशाः योगाभ्यासेन हृदयसंलग्नातेशस्याः क्षेप्याः स्म
र किंशुगौ काशुगाः यस्मात्त्वां विषयेभ्यः परावर्त्तचित्तां अनंतरं प्रियस्य परम
प्रेमास्पदस्य सच्चिदानंदघनस्य परमात्मस्वरूपस्य स्मरतेः सन्निहितानंतर
प्राप्तस्यानुध्यानशाधीध्रं तस्याभिसंभावनासंजाता हर्षेणोद्भूतरोमांचां वि
विधायेयोगास्तहती अष्टांगयोगयुक्तां विशीष्टां योगिनीं वातदृदेक्षत ॥ सा
मर्थ्यादिव शाब्दलाभः वियोगिनी मितिसंप्रचेसादिनाक्विप् ॥ वा घुजेकर्म
कर्त्तरि घञ् ङीप् ॥ दडिमी मिति जाति वाचित्वात् ङीप् ॥ दृढ इड कर्त्तरी निष्ठा
याः मुक्ती तदृति पक्षेप्य चाधेच् ॥ अस्याइति अस्पतेर्हलंतात् कर्मणिण्यण् ॥
८३ ॥ स्मरार्देति ॥ स नलः पलाशे पलाशस्य पुष्पे व्यंतं प्रसवबंधनमालो

॥३३॥

कयन् तं अद्राक्षीत् ॥ किं भूते पलाशे स्मरस्यार्द्धचंद्राकारो यदृषुर्बाणस्त
न्निभे तत्तुल्ये ॥ तद्धाजेवा ॥ तथाहि योगि हृत्खंडिनि विदारके तिपेनक्रशी
यात् साहस्रशातराणां अध्वजुषां पथिकानां पलाशनात् ॥ पलं मांसं अश्ना
तीति पलाशं तस्मात् मांस भक्षणात् स्फुटं प्रकटमेव पलाशो अन्वर्थ
संज्ञे पलाशशब्दस्य व्यसायो जनी पंकाल रवंड जं कालरवंडजातं अ
न्वितं वियोगिहृदि संबंधि रवं [illegible] नशामिवेति लुमो भे श्मा ॥ दक्षिणपा
र्श्वस्थं रक्तमांसं कालरवंडं च ॥ रक्तादिपत्युनिराकृत इतिरः ॥ ८४ ॥
[illegible] नेत्रेण स्वाप
नवेति ॥ दशादशाम्यामुपलक्षितेन नपेण नलेन [illegible]
पि साद रं ददर्श ॥ कुसुमित लतादिदर्शनं विरहिणा [illegible] दर्शो [illegible] भयं रम
णीयदर्शनाच्चादरः तिर्यगादिसंभोगस्तां तानो [illegible] कैर्नाविरहिणां कौतुहलं

॥३३॥

आवहतीति न्यादरः॥ किंभूता लतान वा नू[illegible] केनकामिन्
ल्येन वायुना चुंबिता स्पृष्टा अनपवमक[illegible] करैः कुसुमैर्कंठेः करं
बितां गीमिश्रितं अंगं यस्याः सा तथा स्मिते नाधिकस्तनेन त्रोभी निकुड्म
लानि मुकुलानि यस्याः तथा वाप संबंधात् दरमिषद्रूपते एवं त्रीलीनवि
द्यते बालता बालत्वं यस्याः तरुरा स र्थः॥ यसाय बालतासदृशीतन्विकस्तु
र्यादिगंधयुक्तेन नायकचुंबिता रोमांचयुक्ता गीद्दषद्धास्येन त्रोसितकुड्मडौला
कारदंताद् षत्त्रसालिक कंपयुक्तापरस्त्रिया ध्यंत त्रु पसौंदर्यादादरः तान्याफ
क्तेन केचित्कौतुकी नाय थाहरयते० यद्वा वहतीति वाहः बालल ता गंधस्य त्रौ
त्राव ल्लेत्रास्य वहः लैवं नूतः नवा लता गंधवहस्सरूणस्तेन चुंबिता काचित्
नवोढा लतासदृशी तन्वी नवोढत्वात् सकंपा नकारस्य निषेधार्थस्य समास
त्वात् न लोपाभावः संयोगोपधत्वेपि अंगात्र कंठे श्लिष्यत॥ इति डीपू ॥८५॥
वितन्वतीरिति॥ स्तनलः चंपकानां कोरकावलीः कुड्मलपंक्तिः व्यलोकयत्
ददर्श॥ का इव त्रांबरारे कामस्य बलिदीपिका इव बल्यै पूजार्थं दीपिका इ
व० किंभूता कोरकावलीः पांथाय वे पतंगा त्रालभास्तेषां हिंसने मारणे रू
लिकजुलस्थलात् अनप एवक जुलं तस्य स्थलात् व्याजात् अपुण्यकर्मा
णी पापकर्माणि वितन्वतीः अर्जयंतीः कामो द्वीपकानि चंपकानि द्दष्ट्वा विर
हिणो म्रियंते॥ यथा नान्निस्मितिरोपांथः चंपको परिभ्रमरा नतिष्ठ
तीति केचित् तत्र तिष्ठंति परं म्रियंते इति प्रामाणिकाः॥ ८६॥ अमन्यतेति॥

असौ नलः कुसुमेषुगर्भगं आंतरं प्रदेशागतं परागं पुरापूर्वं स्मरेण पु
रारये त्रिशाबाय मुक्ते पुष्परूपेषु संगतं लग्नं तस्य त्रिवस्यांगलग्नं भस्मेवा
मन्यत ॥ अतर्कयत् ॥ किंभूतं वियोगिनां मंधंकरणं नेत्रोपघातकं तत्तस्मे
आंधलं जनयति ॥ अंधंकरणेति अर्थस्तुगं तत्स्थूलेति खश् ॥ अरुर्द्विषि
दितिमुम् ॥ ८७ ॥ पीकादिति ॥ दूनः संतप्तो नलः स्थूलपद्मिनीं ददर्श ॥
कस्मिन्सति वने पिकालकोकिलानां वियोगिनां दृशामवस्थां भगारुतां
हुंकृतैः वहुंकारैः हत्वा भवतिसति ॥ किंभूते वने उदंचतः उदयं प्राप्नुवं
तः करुणस्य शोकाख्य रसस्य सिंतरः ॥ किंभूतां अनास्थया नलगतयाऽधीरत
याऽक्षिनयवशात् प्रसूनानि पुष्पाणि कमलानि तल्लक्षणकरान् हस्ता
न्प्रसारयति ॥ एवंरीत्यां तां अनास्थया अनादरेणाऽपश्यदितिवा ॥ ॥३४॥
अन्यस्मिन्नपि दयावति कस्यचित्कष्टां दशां भ्रणवतिसती अनिच्छ
या किमनेनेति करं प्रसार्य कश्चनेवारयति ॰ यद्वा अनास्थयासंसा
रानित्यतया अक्षिनयवशात् करं प्रसारयतीति ॰ वने पिकाकूजंति भृं
गा हुंकारं कुर्वंति करुणा पुष्पाणि विकसंति कमलनवोन्मालेति शाव
चंद्रका विरहिणो व्यथत इति भावः [illegible] इति विविधदुःखवा
र्तामितीव पुष्पविकासव्याजेन कर [illegible] रस्य [illegible] रवार्थः ॥ आस्थे सा
तश्चौ पसर्गे इस्स ऊ दून इति दिप्यादि [illegible] नः ॥ करु
णवृक्षपक्षे करुणाख्या ॥ ८८ ॥ रसालेति ॥ [illegible] लैः आ
म्रवृक्षाः तल्लक्षणः शालवृक्षाः समस्त्रयत्ता [illegible] दितिव [illegible] संतः

॥३४॥

भ्रमरास्तेषां आरवः शब्द एव रोषहुंकृतिः [illegible] भ्रू इव
समीरणेन वायुना लोलैः चंचलैः मुकु[illegible] जना
यतर्जनाय भर्त्सनाय पाणीः तान् दृष्ट्वा[illegible] ॥ अन्योपि हुं
कृत्य बलेनांगुल्या दिना तर्जयति [illegible] रूपेव वर्त्तते ॥ दृष्ट्वा
ति दृष्टाः सनि द्विवचने सनिमि [illegible] पो भ्यासलोपः ॥ स्या
द्विनालुके इति तत्वं ॥ भयनीतेस्यादिवक्तव्या ॥ तर्जनानियमितिसमासः ॥
७९ ॥ दिन इति ॥ सनलः पिकान् कोकिलान् द्विजान् पक्षिणः ब्राह्मणां
श्च सखेदं सोद्वेगं प्रेक्षितुं ददर्श ॥ किंभूतानिव इति पूर्वोक्तप्रकारेण
पांथान् जनान् शापत इव पांथेभ्यः शापं ददत इव यतो लोहितेक्षणान्
मत्तत्वात् रक्तनेत्रान् इतीति किं रे पांथ त्वं दिने दिने ऽधिकं स्त्रीतल्लः
स्त्रः एधि त्वम् । पुनः हं मूर्छ मूर्छां च प्राप्नुहि तथा संतापं संतापं प्राप्नुहि इत्
भ स्वं वा पिकः स्वभावाद्रक्तनेत्रः पिकशब्दं श्रुत्वा पांथानां कामात्यं मूर्छा
संतापश्च भवति ॥ सद्विप्रा ब्राह्मणा अपि रक्तनेत्राः संतः शापं ददते ॥ दूरेद्
सनादरे व्ययं ॥ एधि आस्ते ॥ लोटि हुं भ्र न्यात्हध सोरेद्वा विस्मये श्वसो
दिस लोपश्च इति चेत् सते योयाद्यादिनाल्द्वारो अतोहेलुक् ॥ रूठे र्यावा
नींन्द्र निस्संपां थोग इतीति अर्थे पस्पोषानिसमिति णः पंथादेशाश्चे ताप्स
मानत्वात्तावात्पांथानिति द्वितीया ॥ उपा स्वं भावाच्च ॥ शापत इति तद् त्वावः
॥ ८० ॥ अलीति ॥ सनलः चांपेयकुड्मलं मुकुलमधीरया बुध्यानिपीय

सादरमालोक्य० आशंकितवान्॥ चकितः सन् शिवो गिरिजां विपदे विनाशा
य उदितं उदयप्राप्तं तमेव धूमकेतुं उत्पातविशेषं आशंकत तर्कितवान्॥ धू
मकेतुर्विनाशसूचकः किंभूतं कुड्मलं अलिसंजातउच्चशेखरं उच्चाग्रं॥ चांपे
यश्चंपको हेमपुष्पकः इत्यमरः॥ ततो विकासप्रसयस्य पुष्पे तु कुः॥८१॥ गलदि
ति॥ सनलः नागकेसरं केसरकुसुमं शाणमिव निकषपाषाणमिव व्यलोक
यत्॥ किंभूतं भ्रमरस्य परागं गलत्परागं० तया भ्रमीतं गिरिसि भ्रमणस्वने विशे
षेः पतंतीव क्षादागच्छंति प्रसक्तालग्ना भृंगावलिभ्रमरपंक्तिर्यस्मिन् तत्॥
किंभूतं शाणं मारस्य कामस्य नाराचा बाणतुल्य शल्यानि तेषां निघर्षणात्
स्खलंतो अत्र रयंतः ज्वलंतो दीप्यमानाः कणाः स्फुलिंगाः यस्मात् परागो ज्वल
त्कणतत्कणस्थाने भृंगालिर्नाराचघर्षणे शाणस्यापि भ्रमणं भवति० लोहसंघ
र्षज्वलंतः कणाश्च तस्मादुच्छेलं नि० षाणः स्त्रू निकषः कषइत्यमरः॥८२॥

॥३५॥ तदिति॥ स्मरः कामः शीलिमुखाली भ्रमरपंक्ती अवलोक्य स्वचापात् स्वध ३५॥
नुषः निर्गतादुःखेन निर्गतां स्तेषां भ्रमात्मा गांतेः लज्जितो लज्जां प्राप्तइव
लुमोत्प्रेक्षा॥ किंभूता शीलिमुखाली कुसुमाद्पि सुगंधि तदंगं नलांगं उदि
रपपालुकाः पतनशीलाः आगच्छंतीः पद्मा कुसुमात्रसका शातरपालुकाः
यद्वा कुसुमलक्षणात् धनुषः पतो गुण[illegible] शोगुण[illegible]लाषिणीः मौर्वी स्थि
राश्च स्वनंतीः शब्दायमानाः शिलिमु[illegible] चपदं[illegible] कारणं॥ अनिबाणो
शिलीमुखा मुरपावित्यमरः॥ दुर्निर्गता ह[illegible] नति लक्ष्यं चेनस्य
शातितनेधालुश्च्योलजते॥ सुगंधीति सुपूर्वस्य ग[illegible] पालुका शीले

लषयते च कस्य ८३॥ महदिति॥ स्वन [illegible] ॥ बेलिपंच [illegible] रकलंददर्श॥ किंभू
तं मरुताल्लंतो विलसंतोपि पल्लवाः शाखां [illegible] पाकं [illegible] तं० महदेव स्तदल्लं लन्
विलासं कुर्वन्न यः पल्लवो विटपस्तस्य कंट [illegible] कंटकवर्ती [illegible] नखासैः क्षतं० अथवा
तस्य पल्लव इव पल्लव पाणिस्तस्य कंटके [illegible] छाय. र्थः॥ तथा समुच्छलन् ८३ उच्छल
न्चंदनवत्सारं श्रेष्ठं सौगंध्यं यस्मात तत्॥ चंदनस्य सारंसो गंध्यं यस्मादितिच॥ सामन्त्र
वेदन घनसारः कर्पूरो लक्षणया० श्रीखंड फक्तसारक्कइतिवा० अत एव वारनारी
गणिकातस्याः कुचौ ताभ्यां संचिता तुल्या अंचिता वा उपमा सादृश्यं यस्य गणिकस्त
न्तुल्यशोभंवा० कुलस्त्री कुचनखक्षतादि प्राकुचौ तस्य नो चिसमिति वारेति प
दं॥ मालूर श्रीफलानी समरः॥ ललती रूभय पदी॥ सोरस्त्रमिति द्रंगताञ्चलघुपूर्वी
दिसणः॥ कर्मकर्त्तरी केलिमउपसंख्यानान्न पचेलिमं॥ ८४॥ पुवेति॥ सनलः भ
तुणीहस्स प्रकंपितः चकितः किंभूतं गुच्छं पुवद्वयी स्त्री पुंसोद्वयी तस्याः चित्ते अं
तः करणे तयोर्मध्ये पन्निम लनंबुडनं तस्मिन्नुचितानि योग्यानि प्रसूनानि पुष्पा
णि तैः शून्यतरं पूर्णं गर्त्त गकुरं मध्ये बिलं यस्य० एष पाटलाया गुच्छो न भवति किं
तु कामस्य त्रास्त्रेति बुध्या कंपित इत्यर्थः॥ ८५॥ मुनीति॥ अमुनानलेन वने को
रकीतः त्रिति: हस्ता द्युतिर्यस्य मुनिद्रुमः अगस्त्यवृक्षः सिंहिका सुतो राहुरि
वामन्यत० ज्ञात इति तुल्योत्प्रेक्षा॥ किलइवार्थेवा० किंभूतो राहुः तमिस्रपक्षे
